आनन्दरामबहुवाविरचितः

कातन्त्रधातुवृत्तिसारः

डॉ. रमेश भारद्वाज

आनन्दरामबहुवाविरचितः

कातन्त्रधातुवृत्तिसारः

डॉ. रमेश भारद्वाजः
नव्यव्याकरणाचार्यः, M.A., M. Phil., Ph.D.
Ex-visiting Research Fellow, Tokyo University, Japan
संस्कृतविभागाध्यक्षः
मोतीलालनेहरु महाविद्यालयः
दिल्ली विश्वविद्यालयः

विद्यानिधि प्रकाशन
दिल्ली

प्रकाशक :

विद्यानिधि प्रकाशन

डी-10/1061 (समीप श्रीमहागौरी मन्दिर)

खजूरी खास, दिल्ली-110094

दूरभाष : 22967638

प्रथम संस्करण : 2007

ISBN : 81-86700-76-5

मूल्य : 250.00

मुद्रक :

तरुण ऑफसेट प्रिंटर्स (दिल्ली)

विषयानुक्रमणिका

पस्पशा

शिष्टप्रयुक्तानां शब्दानां व्यापकत्वादनन्तप्रयोगविषयत्वाच्च शब्दानामन्वाख्यानात्मकशब्दशास्त्रस्य क्षेत्रमतीव विस्तृतं यथोक्तं पतञ्जलिपादैः **'महान् शब्दस्य प्रयोगविषयः'**। भारतीयसाहित्ये शब्दशास्त्रात्मकव्याकरणशब्दः ब्राह्मणोपनिषद्कालाद् प्रयुज्यमानः। प्रकृतिप्रत्ययप्रतिपादनपरस्य व्याकरणस्य पारिभाषिकशब्दानां परिचयस्तु सर्वप्रथमं गोपथब्राह्मणे प्राप्यते यथा–**ओङ्कारं पृच्छामः, को धातुः, किं प्रातिपदिकं, किं नामाख्यातम् , किं लिङ्गं, किं वचनं, का विभक्तिः, कः प्रत्ययः, कः स्वर उपसर्गो निपातः, किं वै व्याकरणं, को विकारः, को विकारी, कतिमात्रः, कतिवर्णः, कत्यक्षरः, कतिपदः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम् .....। (१-२४)**

महाभाष्यकारोद्धृतागमोक्त्या **'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'** ज्ञायते यत् वेदानां षडङ्गेषु शिक्षाव्याकरणनिरुक्तछन्दकल्पज्योतिष्शास्त्रेषु व्याकरणस्य प्रधानत्वम्। अस्याञ्च व्याकरणाध्ययनपरम्परायां इन्द्रादिप्रणीता नवव्याख्यानभेदाः-

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्।।

कातन्त्रव्याकरणस्य परिचयः

संस्कृतव्याकरणस्य समृद्धपरम्परायामन्यतमं कातन्त्रव्याकरणम्। शर्ववर्मणा काशकृत्स्नव्याकरणमाधारीकृत्य तस्यैव यद् संक्षिप्तरूपमुपस्थापितं तदेव कातन्त्रव्याकरणमिति विदुषामभिप्रायः। कातन्त्रघटक' का 'शब्दः न कुत्सितार्थवाचकः अपितु काशकृत्स्नपदस्यादिमक्षरं गृहीत्वा शर्ववर्मणा स्वस्य

व्याकरणस्य तन्मूलकत्वं सूचितम्। स च स्वकुलाराध्यकार्त्तिकेयसमाराधनपूर्वकं व्याकरणमिदं प्राप्तवान् अतः **कुमारात् प्राप्तस्य कौमार**मिति संज्ञापि कातन्त्रव्याकरणस्य। पुराकाले कातन्त्रव्याकरणस्य न केवलं भारतवर्षे अपितु तिब्बत-नेपाल-भूटान-श्रीलंकादिदेशेष्वपि अध्ययनाध्यापन- परम्परा प्रचलितासीदिति तत्तद्देश-प्रदेशविरचितग्रन्थराशिः सूचयति। सम्प्रति कातन्त्रव्याकरणस्य शाखाद्वयमुपलभ्यते वङ्गशाखा, काश्मीरशाखा चेति च। दुर्गसिंहग्रथितवृत्त्यालंकृताया वङ्गशाखाया एव पूर्वभारते प्रचारः प्रसारश्च दृश्यते।

कातन्त्रव्याकरणविकासक्रमविषये विदुषामभिमतमिदं यत्-कातन्त्रव्या-करणे शब्दसाधनप्रक्रिया अन्येषां व्याकरणपरम्पराणामपेक्षया संक्षिप्ता सरला चेति। लौकिकशब्दसाधनपरेण शर्ववर्मणा सन्धि-नामचतुष्टय-आख्यातात्म-कास्त्रयोऽध्याया विरचिताः। वररुचिना कृत्सूत्राणि प्रणीतानि। दुर्गसिंहेन शर्ववर्म-कात्यायनप्रोक्त-सूत्राणि स्वविरचितवृत्त्या अलंकृतानि! डा० जानकीवल्लभद्विवेदिपादानां संशोधनानुसारं सम्प्रति वङ्गीयकातन्त्रवाङ्मये सप्तविंशतिः, उत्कलप्रदेशीयवाङ्मये षट्, काश्मीरके सप्त, राजस्थानीये षोडश ग्रन्था हस्तलिखिता मुद्रिता, तिब्बतीभाषायाञ्चानुदिता प्राप्यन्ते द्वादश ग्रन्थाः। दाक्षिणात्यकातन्त्रवाङ्मयविषये नाद्यपर्यन्तं किमपि प्रामाणिकसूचनम्।

कातन्त्रव्याकरणस्य वैशिष्ट्यम्

व्याकरणस्य न केवलं वेदानां षडङ्गत्वमात्रमपितु सकलशास्त्रो-पकारिचरित्रं यतो हि वेदाङ्गत्वेन व्याकरणक्षेत्रं संकुचितभावत्वमाप्नोति। कातन्त्रव्याकरणे सरलशैल्या लोकप्रसिद्धोदाहरणसंयोजनेन संस्कृतवाण्याः लोकभाषारूपत्वं संयुज्यते। दुर्गसिंहेन तु विशेषतो व्याकरणपारिभाषिकतथ्यानां व्याख्यानावसरे सरसता सम्पादिता।[1]

व्याकरणशास्त्रस्य पूर्णतायै सूत्ररचनया सह धातुपाठ-गणपाठ-लिङ्गानुशासनोणादिसूत्राणां रचना त्वावश्यक्येव, अतः कातन्त्रपरम्परायां शर्ववर्मोत्तरवर्त्ति-आचार्यैर्महान् प्रयत्नः कृतः।

---

1. अः इति विसर्जनीयः। अकार इह उच्चारणार्थः। कुमारीस्तनयुगाकृतिर्वर्णो विसर्जनीयसंज्ञो भवति। - दुर्गसिंहः, कातन्त्र 1.1.16
वज्राकृतिर्वर्णो जिह्वामूलीयसंज्ञो भवति। -दुर्गसिंहः

कातन्त्रधातुपाठः

निरुक्ते प्रातिशाख्येषु च प्राप्यते धातुशब्दव्यवहारः अत एव कथितुं शक्यते यद् धातुसंज्ञेयमतीवपुराणी, तथाचोक्तं महाभाष्यकारपादैः 'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्' (3-3-1)। भोजराजेन तु शृंगारप्रकाशे षड्धा धातवो विभक्ता "तत्र धातवः षोढा (1) परिपठिताः भूवादयः, (2) अपरिपठिता आन्दोलयत्यादयः, (3) सूत्रपठिताः, स्कुस्कम्भ- स्तम्भेत्यादयः, (4) सनाद्यन्ताः प्रत्ययधातवः, (5) नामधातवः कण्ड्वादयः, (6) होडगल्भृ-क्लीबप्रभृतयः प्रत्ययनामधातवश्च।

कातन्त्रीयानुशासने शर्ववर्मणैवाद्यः धातुपाठः प्रणीतः तदीयधातुपाठस्यैव च परिष्कारः श्री दुर्गसिंहेन कृत इति विदुषामभिप्रायः। तस्यैव धातुपाठस्योपरि दुर्गसिंहेन गणवृत्तिनाम्नी वृत्तिरपि प्रणीता। ताञ्च दौर्गवृत्तिमाधारीकृत्य त्रिलोचनदासः धातुपारायणाख्यं ग्रन्थं प्रणीतवान्। रमानाथशर्मणा च तमधिकृत्य 'मनोरमा' (अस्याः व्याख्यायाः पञ्चषा हस्तलेखा जम्मूस्थरणवीरपुस्तकालये, वाराणसीस्थ-सरस्वतीभवने च प्राप्यन्ते)नाम्नी व्याख्या धातूनां यथायथं निर्धारणाय प्रणीता। यथोक्तं ग्रन्थारम्भे -

प्रायेण धातुवैषम्यात् सर्वेषां घूर्णते शिरः।
या तत्क्रियायै प्रभवेत् सैव वृत्तिर्मनोरमा।।
भूरि सूरिकृता वृत्तिर्भूयसी युक्तयुक्तिका।
निश्चेतुं धातवस्तस्यां न शक्यास्तेन मे श्रमः।। इति।

एतेनेदमपि ज्ञातुं शक्यते यदनेकैराचार्यैरस्य व्याख्यानं कृतमासीँदिति। रमानाथेन व्याख्याते कातन्त्रधातुपाठे प्रायेणाष्टादशशतं (1800) धातवः पठिता दृश्यन्ते। क्वचित् पाठे दण्डकशैल्यपि समाश्रिता। जुहोत्यादेरदाद्यन्तर्गतत्वान्नवैव गणा इह मन्यन्ते–

1. भ्वादिः, 2. अदादिः, 3. दिवादिः, 4. स्वादिः, 5. तुदादिः, 6. रुधादिः, 7. तनादिः, 8. क्र्यादिः, 9. चुरादिः। उक्तं च–

भ्वद्दिव्षुतुदाद्याश्च रुध्तन्क्रीचुरादयः।
इमे नव गणा ज्ञेया धातूनां शार्ववर्मिके ।। इति।

एषु नवसु धातुगणेषु एकोनत्रिंशत्संख्याका अन्तर्गणा अपि वर्तन्ते। धातुषु कार्यविशेषविधानाय विंशतिरनुबन्धा योजिता–

1. आ, 2. इ, 3. इर्, 4. ई, 5. उ, 6. ऊ, 7. ऋ, 8. लृ, 9. ए, 10. ओ, 11. क्, 12. ङ्, 13. ञ्, 15. ट्, 16. टु, 17. डु, 18. ण्, 19. प्, 20. ष्

गणप्रदीपनाम्नाऽपि धातुपाठोऽयमुपलभ्यते। अत्र द्युतादि–वृतादि–घटादिप्रभृतयो नवविंशतिरन्तर्गणा अपि पठिता:।

आत्मनेपद- परस्मैपदव्यवस्थाविषये पाणिनिमतमपेक्ष्य शर्ववर्ममतेऽस्ति वैशिष्ट्यम्। तद् यथा-

विशेष: पाणिनेरिष्ट: सामान्यं शर्ववर्मण:।
सामान्यमनुगृह्णन्ति तत्राचार्यपरम्परा।। इति।

को नाम धातु:

धातुसंज्ञेयमतीव प्राचीनकालादेव भाषायां प्रयुज्यमाना।[1] यथा च गोपथब्राह्मणे-ओङ्कारं पृच्छाम:-को धातु:, किं प्रतिपादिकम् (1-1-24) इति। 'दधाति विविधान् अर्थान् य: स धातु:' इति व्युत्पत्तिपरस्य धातुशब्दस्य पूर्वाचार्यकृतसंज्ञाश्रयणपूर्वकं पाणिनिना 'भूवादयो धातव:' (1-3-1) इत्यनेन धातुसंज्ञा निर्दिष्टा अर्थात् गणपठितानां भू-आदिशब्दानां क्रियावचनानां धातुसंज्ञा भवतीति।[2] तदेव पाणिनिमतमधिकृत्य जैनेन्द्रव्याकरणे 'भूवादयो धुरित्युक्तम्। शर्ववर्मणा स्पष्टतयैव 'क्रियाभावो धातु:' (3-1-9) सूत्रेण धातुशब्दार्थ: सूचित:। अस्य सूत्रस्य व्याख्यां कुर्वन् दुर्गसिंह: भर्तृहरिवचनपुरस्सरं

---

1. (क) लिङ्गं धातुं विभक्तिं च संनमेत् तत्र तत्र च।।
यावतामेव धातूनां लिङ्गं रूढिगतं भवेत्।।
धातुजं धातुजाज्जातम्।। बृहद्देवता, 2-101, 102, 104

(ख) गतिपूर्वो यदा धातु: क्वचित् स्यात् तद्धितोदय:।
–अथर्ववेदप्रातिशाख्य, 1-1-11

(ग) उपसर्गस्य धातावेकाक्षरे नामभूते इति। ऋक्तन्त्र, 5-2-6

2. क्रियावचनानामेव धातुसंज्ञा विधीयते। काशिकान्यास, 1-3-1
(जिनेन्द्रबुद्धि)

कथयति-"यः शब्दः क्रियां भावयति प्रतिपादयति स धातुसंज्ञो भवति।"[1] कातन्त्रव्याकरणस्य काश्मीरशाखायाः समुपस्थापकेन भट्टेनोग्रभूतिना शिष्यहितान्यासे[2] सूत्रस्यास्य व्याख्यानावसरे प्रतिपादितम्-'तेन यश्शब्दः क्रियां भावयति प्रतिपादयतीति प्रतिपत्तृबुद्धावुपस्थापयतिक्रियाविशेष-प्रतीतिमुपजनयति स धातुसंज्ञ इत्यर्थः।' अर्थात् साध्यमानावस्था पूर्वापरीभूता-वयवैकफलमुद्दिश्य प्रवर्तमानैकत्वेनाध्यवसितो व्यापारात् साक्षात्प्रवाहः क्रिया, तस्याः प्रतीतिं य उपपादयति स धातुरिति। कातन्त्रव्याकरणस्येमां स्पष्टार्थोन्मुख-सरलसरणिमनुसृत्यैव च परवर्तिवैयाकरणैरुक्तम्-'क्रियार्थो धातुः' (शाकटायन-व्याकरणम् - 1-1-22), 'क्रियार्थो धातुः' (हैमशब्दानुशासनम् 3-3-3-) इति।

धातुविज्ञाने उपसर्गाणां भूमिका

संस्कृतव्याकरणे द्वाविंशतिसंख्यकाः उपसर्गाः यदा धातुभिर्संयुक्ताः भवन्ति तदा तेषामर्थवैलक्षण्यं दृश्यते। यत एवोच्यते शास्त्रकारैः **'उपसर्गेण धात्वर्थो बलादन्यत्र नीयत'** इति। कातन्त्रपरम्परायां पुरुषोत्तमदेवेन विंशति-उपसर्गाः अर्थनिर्देशपूर्वकाः पठिताः। तत्र निस्-दुस् उपसर्गद्वयस्य परित्यागः।

पुरुषोत्तमदेवविरचितानि **उपसर्गसूत्राणि**

[कलापसूत्रम्-ग्रन्थस्य 117 तमे पृष्ठे मुद्रितानि]

1. प्र ग्रन्थारम्भोत्कर्षसर्वतोभावप्राथम्यख्यात्युत्पत्तिव्यवहारेषु।
2. परा भङ्गानादरप्रत्यावृत्तिन्यग्भावादिषु।
3. अप अनादरभ्रंशासाकल्यवैरूप्यत्यागनञर्थेषु।
4. सम् प्रकर्षश्लेषनैरन्तर्यौचित्याभिमुख्येषु।

---

1. क्रियते इति क्रिया साध्यमुच्यते, सा च पूर्वापरीभूतावयवैव।
   * * * "*यावत् सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते।*
   आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते" (वा. प. 3/8/1)
   कातन्त्रव्याकरणम् भाग-3, पृ. 38
2. शिष्यहितान्यासः, पृ. 332

5. अनु पश्चात्सादृश्यलक्षणवीप्सेत्त्थम्भावभागहीनसहार्थसामीप्यदीर्घपुनरर्थेषु।
6. अव निश्चयासाकल्यानादरेषु।
7. निर् अत्यर्थनिषेधनिश्चयबहिष्करणेषु।
8. दुर् निषेधकष्टनिन्दावक्षेपणेषु।
9. अभि समन्तादुभयार्थलक्षणवीप्सेत्थम्भावधर्षणेषु।
10. वि विशेषवैरूप्यनञर्थगतिदानेषु।
11. अधि उपरिभावे।
12. सु पूजनायासातिशायनेषु।
13. उद् ऊर्ध्वोत्कर्षप्राकट्यनैकट्येषु।
14. अति अतिशयक्रान्तिपूजासंभावनेषु।
15. नि निश्चयनिषेधयो:।
16. प्रति लक्षणव्यावृत्तिप्रसक्तीत्त्थम्भावत्यागप्रत्यर्पणसादृश्यविरोधवीप्सा-समाधिषु।
17. परि सर्वतोभावातिशयवीप्सेत्त्थम्भावचिह्नभागत्यागनियमेषु।
18. अपि आवरणसंभावननिन्दानुज्ञाल्पत्वसमुच्चयेषु।
19. उप अनुगतिपश्चाद्भावानुकम्पाधिक्यहीनसामीप्यप्राथम्येषु।
20. आङ् समन्ताद्ग्रहणप्रत्यावृत्तीषदर्थमर्यादाव्याप्तिषु।

कातन्त्रधातुवृत्तिसारस्य रचयिता

आनन्दरामबहुवामहाभाग:

(Annudoram Barooah-1850-1889)

एकोनविंशतिशताब्द्या उत्तरार्धे संस्कृतज्ञानविज्ञानस्य व्याख्यातार बहव: संजाता:, तेषु मूर्धन्यतम: आनन्दरामबहुवामहाभाग:। असमप्रान्तस्य कामरूपक्षेत्रे

स्थितस्य गुवाहाटीनगरस्योत्तरक्षेत्रे 1850 खिस्ताब्दे मईमासे पण्डितप्रवरोऽयं प्रादुर्भूत:। तत्कालीनब्रिटिश-शासनव्यवस्थाया भारतीयप्राशासनिकसेवायां (I. C. S.) चयनितेन तेन बहुवामहाभागेन देववाण्या: प्रचार-प्रसारार्थं तस्याश्च आधुनिकवैज्ञानिकदृष्ट्या अनुसन्धानपरकरूपप्रकटने स्वजीवनमर्पितं कृतमासीत्। सिविलसेवायां कार्याधिक्यसंजातपरिश्रमोऽपि तं देववाण्याराधनान्न स्खलितवान्। निजसंशोधनकार्ये सहयोगार्थञ्च शास्त्रतत्त्वार्थप्रतिपादनपरेणानेन स्ववित्तपोषित-परम्परागतविदुषां गोष्ठी च पालिता।

शास्त्रमर्मप्रकाशनात्मके द्वादशवर्षीयाल्पावधियुक्ते अनुष्ठाने बहुवापादैरनेके ग्रन्था: विरचिता:। तत्र सर्वप्रथमं English-Sanskrit Dictionary (1877–1880) तदनन्तरञ्च तस्यैव शब्दकोषस्य परिपूर्त्यर्थं द्वितीयभागात्मकखण्ड: उच्चतरसंस्कृतव्याकरणविषयक: (Higher Sanskrit Grammar) तृतीयभागात्मकश्च खण्ड: प्राचीनभारतीयभूगोलविषयक: विरचित:। स्वग्रथितजानकीरामभाष्यसमोपेतस्य महाकविभवभूतिप्रणीत-महावीरचरितस्य प्रकाशनं कृतं तमधिकृत्य च "संस्कृतवाङ्मये भवभूते-र्वैशिष्ट्यपरक: लघुप्रबन्ध: (Bhavabhuti and his Place in Sanskrit Literature) लिखित:। कलकत्ताविश्वविद्यालयस्य च स्नातककक्षायाम-ध्ययनशीलछात्राणामुपकारार्थमुपरचितवान् सहायिकाम् (A Companion to the Sanskrit reading for undergraduate Students' of the Calcutta University).

संस्कृतभाषाया: सर्वाङ्गीणव्याकरणोन्मुखज्ञानार्थम्, ऐतिहासिक-परिप्रेक्ष्ये च समीक्षात्मकतुलनात्मकदृष्ट्या विवेचनार्थम् आनन्दरामबहुवामहोदय: दशप्रखण्डात्मकप्रकल्पमुद्घोषितवान्। अयञ्च प्रकल्प: संस्कृतव्याकरणस्य यथाशक्तिसरलीकरणम्, ऐतिहासिकपरिप्रेक्ष्ये विकासपरीक्षणम्, उपलब्ध-संस्कृतसाहित्यसन्दर्भे तेषां व्याख्यानम् च-एतया प्रणाल्या वेदार्थतत्त्वस्य मीमांसां प्रपूरयिष्यीतीति बहुवापादैराकाङ्क्षितमासीत्। सन्दर्भेऽस्मिन् प्रथमपुष्पं 1882 खिस्ताब्दे छन्द: शास्त्रात्मकं Prosody शीर्षक:। तदनन्तरं च

नामार्थसंग्रहः- सरस्वतीकण्ठाभरण–नामलिङ्गानुशासन–कातन्त्र-धातुकोष–धातुवृत्तिसाररूपाः ग्रन्थाः प्रकाशनं लेभिरे।

कातन्त्रधातुवृत्तिसारः

संस्कृतव्याकरणस्य समृद्धपरम्परायामन्यतमस्य शर्ववर्मणा प्रणीतस्य कातन्त्रव्याकरणस्य शाखाद्वयमुपलभ्यते वङ्गशाखा, काश्मीरशाखा चेति। दुर्गसिंहग्रथितवृत्त्यालंकृताया वङ्गशाखाया एव पूर्वभारते प्रचारो दृश्यते। आनन्दरामबहुवापादैः दुर्गसिंहगणवृत्तिमाश्रित्य रमानाथविरचितमनोरमां च विविच्य धातुवृत्तिसारः प्रकल्पितः। यथोक्तं ग्रन्थान्ते–

"कौमारहारगणकारविवारसारं
श्री दुर्गसिंहरचितं गणवृत्तिसंज्ञम्।
श्रीमद्रमाविरचितं च मनोरमाख्यम्
दृष्ट्वा विविच्य विचितो धातुवृत्तिसारः॥

आनन्दरामबहुवाचरणैः कातन्त्रगणवृत्तिमवलम्ब्य बृहद्- धातुसंग्रहः 'धातुकोषेति नाम्ना संगृहीत इति विदुषामभिमतं परं सः न मया पर्यालोचितः। धातुवृत्तिसाररूपोऽयं ग्रन्थः तस्यैव धातुकोषस्य मर्मप्रतिपादनपर इति विश्वसिमि।

अस्य ग्रन्थस्य संकलने प्रकाशने च बहुवाश्रीपादानामुद्देश्यमासीत् प्राच्यपरम्परानुसारि-अध्ययनकेन्द्राणां पाठशालानां ('टोल' इति तत्कालिकसंज्ञा) पण्डिताः शब्दहृदयात्मकधातुविज्ञानेन समवेताः स्युः। एतदर्थमेव तैः पुस्तकमूल्यं न्यूनतमं निर्धारितमासीत्। 1977 वर्षे असमसर्वकारस्य प्रकाशनविभागेन (पब्लिकेशन बोर्डेति संस्थया) पुनर्मुद्रणे सैव दृष्टिः परिपालिता। तां च परम्परामनुसृत्य विदुषामध्यापकानां जिज्ञासुछात्राणां विशेषतोऽनुसंधित्सूनामुपकारार्थं कृतोऽयं प्रयत्नः।

विदुषां परितोषायानुसंधित्सूनां च सौकर्यबुद्ध्या पृष्ठसंख्यासमन्विता अर्थसहिता च धातुसूचिः ग्रन्थान्ते संयोजिता। मूलग्रन्थे च यत्र कुत्रापि वाक्यप्रयोगाभावः दृष्टः तत्र तत्र वाक्यप्रयोगः संयोजितः, तथा च पाठाशुद्धिरपि

यथामति शोधिता। अस्य ग्रन्थस्य परिशोधनकार्ये मम सहाध्यापकः डा० श्रीवत्समहोदयः नैकान् धातुपाठान् परिशील्य महान्तं सहयोगं कृतवान् इति तम् धन्यवादैः योजयामि। मुद्रणदोषात् सीमितज्ञानाद्वाऽऽगतानामशुद्धीनां परिहाराय क्षमायाचनातो नान्यन्मे शरणम्।

सन्निधि, राजघाट, **रमेशचन्द्रभारद्वाजः**

नूतनदिल्ली

19 January, 2007

118th Death Anniversary

of Pt. Anandram Borooah

अथ कातन्त्रधातुवृत्तिसारः

भ्वादिगणः

१. **भू सत्तायाम्–** सतो भावः प्रवृत्तिनिमित्तं सत्ता।
भवति केदारेष्वङ्कुरः।

२. **चिती संज्ञाने–** निद्राव्यपगममात्रेऽकर्मकः, ज्ञानमात्रे सकर्मकः।
निद्राव्यपगममात्रे – चेतति सुप्तः प्रभाते।
ज्ञानमात्रे – चेतति सुहृदं सहृदयः।

३. **अत सातत्यगमने–** नैरन्तर्येण भ्रमणं प्रापणं वा सातत्यगमनम्।
अतति वातः,
अतति तरणिरस्तं वा।

४. **च्युतिर् आसेचने–**
च्योतति घृतं हुताशने, यायजूकः आसिञ्चतीत्यर्थः।

५. **श्च्युतिर् क्षरणे–** क्षरणं चलनं गमनमित्यर्थान्तरम् ।
श्च्युतति शोणितं युधि धीराणां व्रणेभ्यः।

६. **मन्थ विलोडने।** विलोडनमाकुलीकरणं घट्टनमिति यावत्,
मन्थति दधि आभीररमणी।

७. **कुथि हिंसासंक्लेशयोः–** प्राणवियोगफलकव्यापारो हिंसा,
दुःखानुभवः संक्लेशः। अत्राकर्मकोऽयम्।
कुन्थति गर्भिणी शूलेन।
मथि इत्यपरे, मन्थति। माथि इत्यन्ये, मान्थति।

8. **युथि हिंसासंक्लेशयोः–**
युन्थति बाला अपशब्देन।

9. **लुथि हिंसासंक्लेशयोः–**
लुन्थति रामः बाणेन।

१०. **षिधु गत्याम्–** प्रतिषेधति, धातोरनेकार्थत्वेन गतेरन्यत्र उपसर्गाच्च
षत्वार्थः। गतौ तु – अभिसेधति गौर्गोष्ठम्।

११. **षिधू शास्त्रे माङ्गल्ये च–** शासनं शास्त्रं माङ्गल्यं क्षेमकरणं अनयोरेवार्थयोरूदनुबन्धः प्रयुज्यते, अर्थान्तरे पुनरुदनुबन्धः पूर्ववदेव, अन्यथा तदुपादानमनर्थकं स्यात् अर्थान्तरेऽनेनैव विकल्पस्य सिद्धत्वात्।

सेत्स्यति सेधिष्यति वा अभिनवजाततनयमभिवीक्षितुं प्रेक्षापूर्वकारी।

१२. **खादृ भक्षणे–**

खादति गुडं पोतः।

१३. **बद स्थैर्ये–** स्थैर्यं स्थिरीकरणमित्यर्थः।

बदति पदं विमृष्य वैयाकरणः।

बद्यते बदितं अयजादित्वात् न संप्रसारणम्।

उणादौ बदरी बदरम्।

१४. **खद हिंसायां च–** चकारः स्थैर्यापेक्षया,

खदति क्षुद्रं दृप्तः कुराजनि देशे।

उणादौ खदिरः।

१५. **गद व्यक्तायां वाचि–** व्यक्तोक्तं व्यक्तोच्चारणमित्यर्थः।

गदति पटुरभिमतार्थम्।

१६. **रद विलेखने–** विलेखनमिह सरेखीकरणम्।

रदति पाषाणं द्विपः।

१७. **णद अव्यक्ते शब्दे–**

नदति मयूरो मेघोपगमे।

१८. **अर्द गतौ याचने च–**

चकारोऽनुक्तसमुच्चये तेन पीडायामपि।

अर्दति शिरः कठिनतरः कफः कोमलाङ्गानाम्।

१९–२० **नर्द गर्द शब्दे–**

नर्दति शरदि वलीवर्दः, प्रनर्दति।

अन्ये तु णोपदेशं पठित्वा प्रणर्दतीत्याहुः। तदप्रमाणम्। तथा चोक्तं–सर्वे नादयो णोपदेशाः।

नृतिनन्दिनर्दिनक्किनटिनाटिनृनाथृनाधृवर्जम् इति।

२१. **तर्द हिंसायाम्–**
तर्दति दानवं दैत्यारिः सुदर्शनेन।

२२. **कर्द कुत्सिते शब्दे–**
कर्दति विष्टम्भवान् पामरः।

२३. **खर्द दंशने–** दंशनमिह दंशनक्रियाभिधीयते। स्वभावाच्च धातुः साधनसमवायी।
खर्दति व्यालो वृषभम्।
अन्ये तु धातुपारायणिकाः खर्द दन्दशूक इति वदन्ति। दंदशनशीलो दन्दशूक उच्यते। अनेन तद्विषया क्रिया कल्प्यते धातोः क्रियार्थकत्वात् दंदशन इति स्वतन्त्रनिर्देशेऽपि तद्विषया प्रतीयते, किन्तु साधननिर्देशः साधनसमवायिव्याख्यानार्थः।

२४-२५. **अति अदि बन्धने–**
अन्तति अन्दति वा विरुद्धमतिं नरपतिः।
अन्दूः गजबन्धनी रज्जुः।

२६. **इदि परमैश्वर्ये–**
इन्दति, इन्द्रः, इन्दुः।

२७. **बिदि अवयवे–**
बिन्दति, बिन्दुः।

२८. **णिदि कुत्सायाम्–**
निन्दति विधुं विरही।

२९. **टुनदि समृद्धौ–**
नन्दति चन्द्रोदये चकोरः।

३०. **चदि आह्लादने दीप्तौ च–**
चन्दति चन्दनं चन्द्रः।

३१. **त्रदि चेष्टायाम्–**
त्रन्दति त्रिपुरदाहाय हरः।

३२-३४. **कदि क्लदि क्रदि आह्वाने रोदने च–**
कन्दति कन्या स्तनार्थिनी, कन्दः, क्लिन्दति, आक्लन्दः।
रोदने-क्रन्दति बुभुक्षितः बालः।

३५. **क्लिदि परिदेवने–**
परिदेवनं रोदनेन नार्थान्तरं–
क्लिन्दति कुलवधू: शोकेन।

३६. **शुन्ध शुद्धौ**, शुद्धि: शुचीभवनम्–
शुन्धति नदी स्रोतसा, शुधित: शुद्ध:।

३७. **फक्क नीचैर्गतौ–**
फक्कति फलं वृक्षाग्रात्, फक्किका।

३८-४०. **तक कक्ख घग्घ हसने–**
तकति कक्खति घग्घति वा नीचोऽश्लीलोक्त्या, घग्घा।
अन्य: गग्घ इति पाठं मन्यते।

४१. **तकि कृच्छ्रजीवने–**
तङ्कति दरिद्र:, आतङ्क:।

४२. **शुक गतौ–**
शोकति शुक: शालिक्षेत्रम्।

४३. **बुक्क भषणे–** भषणं कुक्कुरकर्तृको रव:।
बुक्कति श्वा।

४४-४८. **ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयो:–**
शोषणं स्नेहापगम:, अलमर्थो भूषणपर्याप्तिवारणं च।
ओखति शालिरातपे। ध्राखयति अदध्राखत्।
केचिदिदं न पठन्ति।

४९-५०. **शाखृ श्लाखृ व्याप्तौ–**
शाखति शाख नभस्तलम्।

५१-७१. **उख णख वख मख रख लख लखि इखि ईखि वल्ग रगि लगि अगि वगि मगि श्वगि त्वगि इगि रिगि लिगि गत्यर्था:–**
ओखति खलं क्षेत्रवान्, उखा, नख:, ववाख, मख:, रखति, लखति, लङ्ग:, अङ्ग:, वङ्ग:, मङ्गलं, श्वङ्ग:, त्रङ्ग:, इङ्ग:, लिङ्गम्। अत्रेव उगिमपि केचित् पठन्ति–उङ्गति। रख रिखि स्वगि शृगि इत्यन्य:।

७२. **त्वगि कम्पने—**
त्वङ्गति वातुलस्याङ्गम्।

७३-७५. **युगि जुगि वुगि वर्जने—**
युङ्गति सङ्गं योगी।

७६. **दघि पालने च—**
दङ्घति दाम्भिको राष्ट्रम्।

७७. **लघि शोषणे च—** शोषणमिहाल्पीकरणम्।
लङ्घति वाडवी जलधिम्।

७८. **शिघि आघ्राणे—**
शिङ्घति कुसुमं विलासी। रूढौ शिङ्घणकः।

७९. **शुच शोके—**
शोचति सत्पुरुषः प्रासादम्, अशोकः।

८०. **कुच शब्दे तारे च—**
तार इह शब्दविशेषणम्। महति शब्दे चकार उक्तसमुच्चयमात्रे केचित्। संप्रदायविदस्तु तारश्चिक्कणता।
काचति काञ्चीं वणिक्, चिक्कणयतीत्यर्थः।

८१-८२. **कुन्च क्रुन्च कौटिल्याल्पीभावयोः—**
कुञ्चति क्रुञ्चति च वसनं कुटिलम्, अल्पं च भवतीत्यर्थः।
तर्योर्भावनायां च कुटिलम् अल्पं च करोतीति सकर्मकौ।

८३. **लुन्च अपनयने—**
लुञ्चति केशान् शोकाकुला।

८४. **अन्चु गतिपूजनयोः—**
अञ्चति गुरुं ग्रामं वा गुणवान्।

८५-९३. **वन्चु चन्चु तन्चु त्वन्चु म्रन्चु म्रुचु म्लुचु ग्लुचु षस्ज गतौ—**
वञ्चति पण्यं वणिक्, चञ्चुः, तक्रम्। त्वक्त्वा त्वञ्चित्वा नायं त्वन्चु मन्चु इत्येके, मञ्च। म्रक्त्वा म्रञ्चित्वा नायमस्तीति केचित्। सज्जति सिषज्जिषति नायं सज्जिः, षश्चिरित्येके, तदा सनि सिषश्चिषतीति स्यात्।

९४-९७. **ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे–**
ग्रोचति चौरः परवित्तम्, खोजति, खोक्त्वा, खोजित्वा, खुजित्वा।

९८. **अर्च पूजायाम्–**
अर्चति गुरुं शिष्यः।

९९. **म्लेछ व्यक्तायां वाचि–**
म्लेच्छति कुवाचः व्यक्तं वदतीत्यर्थः। अव्यक्तायामपि केचित्।

१००-१०१. **लछ लाछि लक्षणे–**
लच्छति लाञ्छति गोपालको गां चक्राङ्गेन।

१०२. **वाछि इच्छायाम्–**
वाञ्छति सुखं रोगी।

१०३. **आछि आयामे–**
आयामो दीर्घीकरणम्। आञ्छति कटं कटकारः।

१०४. **ह्रीछ लज्जायाम्–**
ह्रीच्छति गच्छन् परदारान्, ह्रीच्छा।

१०५. **हुर्छा कौटिल्ये–**
हुर्छति लोचने क्रोधनः।

१०६. **मुर्छा मोहसमुच्छ्राययोः–**
मूर्छति शोकेन कातरः।
ह्रस्वोपधोऽयं, तेन क्विपि मुरौ मुर इति सिद्धम्।

१०७. **स्फुर्छा विस्मृतौ–**
स्फूर्छति वातुलः पूर्ववृत्तम्। नायं स्फुर्छेत्येके।

१०८. **पुछ प्रमादे–**
पुच्छति व्यासक्तो हितवस्तुनि। युछ इत्येके।

१०९. **उछि उञ्छे–**
उञ्छनं स्फोटनमित्येके।
उञ्छनमुद्धृतसारक्षेत्रादवशिष्टापहरणम्।
उञ्छति क्षेत्रे धान्यं तपस्वी।

१९०. **उछी विवासे–**
विवासोऽतिक्रमः–रजन्यां व्युष्टायामुषसि जनयामास तनयम्।
एताविह प्रमादात् पठितौ,
तुदादिपठिताभ्यामप्यभिमतरूपसिद्धेः।

१११-११६. **व्रज धृज ध्रजि ध्रज ध्वज वज गतौ–**
व्रजति ग्रामं प्रवासी, धर्जति, दधर्ज। केचित् घृजिध्वजी अपि।

११७. **अज क्षेपणे च–** चकाराद् गतौ च
प्राजति प्राजनेन गोरक्षको गाम्। ओज पालने इति केचित् असुनि ओजः।

११८-११९. **अर्ज सर्ज अर्जने–**
धनमर्जति भोगार्थी। अचि सर्जा वृक्षविशेषः।

१२०. **कर्ज व्यथने–**
कर्जति कायिणं दुविहितं कायम्।

१२१. **खर्ज मार्जने च–**
खर्जति खर्जूः पृथग्जनम्। चकारो व्यथानुकर्षणाय, खर्जूरः।

१२२. **खज मन्थे–** मन्थो विलोडनम्।
खजति दधि गोपालिका।
भिदादित्वात् खजा भक्तादिमन्थनकाष्ठादिः।

१२३. **खजि गतिवैकल्ये–**
खञ्जति विपादिकावान्, खञ्जः, खञ्जनः।

१२४. **एजृ कम्पने–**
एजति पताका वातेन।

१२५. **टुओ स्फुर्जा वज्रनिष्पेषे–**
निष्पेषो विद्युत्पाकघनध्वनिः–स्फूर्जति वज्रं वर्षासु।

१२६. **क्षि क्षये–**
क्षयति रोग औषधप्रयोगात्।
अत्रैव क्षि निवासगत्योरिति पठन्ति, तदस्माकमसम्मतम्

अनेकार्थादेव तयोरर्थयोर्ग्रहणात्।

१२७-१२९. **क्षीज कूज गुजि अव्यक्ते शब्दे–**

क्षीजति पक्षी, कूजति कोकिलः, गुञ्जति भ्रमरः।

१३०-१३४. **लज लाजि लाज लजि तर्ज भर्त्सने–**

भर्त्सनं निन्दा–लजति लाञ्जति लाजति लञ्जति तर्जति दुर्जनः साधून्।

१३५-१३६. **जज जजि युद्धे–**

युद्धमिति भावे क्तः। प्रहारार्थं जजति जञ्जति।

१३७. **तुज हिंसायाम्–**

तोजति चिन्तां, तितिक्षा।

१३८. **तुजि वलने च–**

तुञ्जति दैत्यं दैत्यारिः। चकारो हिंसानुकर्षणार्थः।

१३९-१४३. **गज गृजि मृज मृजि गर्ज शब्दार्थाः–**

गजति गजः। मृजस्थाने मुज इत्येके। गजि इति च।

१४४. **शौटृ गर्वे–**

शौटति दुर्जनो धनागमे, गर्वं करोतीत्यर्थः, शौटीरः।

१४५. **यौटृ सम्बन्धे–**

यौटति वलयं वणिक्।

१४६-१४८. **मेटृ म्रेटृ म्लेटृ उन्मादने–**

मेटति म्रेटति वातकी, उन्माद्यतीत्यर्थः।

१४९. **कटे वर्षावरणयोः–**

आवरणार्थे-कटति कुचं कामिनी कञ्चुकेन।

वर्षार्थे-कटति जलदो वर्षासु।

गतिपठितस्यानयोरर्थयोरकाटीदिति प्रयोगनिवृत्त्यर्थम्।

१५०. **रट परिभाषणे–**

रटति कुट्यां पारावतः। केचित् रठ इति।

१५१. **लट बाल्ये च–**

दिने दिने लटति लोलः, शिशुर्भवतीत्यर्थः।

चकाराद् भाषणे च। ललाटं, लट्टा।

१५२. **शट रुजाविश (स?) रणगत्यवसादनेषु–**
शटति रुजति विश्रृणाति (विसरति?)
विकसति गच्छति अवसीदति वेत्यर्थः, शाटिः।

१५३. **वट वेष्टने–**
वटति वटः पन्थानम्।

१५४. **खिट उत्त्रासने–**
खेटति आखेटिकः मृगान्।
किटमपि एके।

१५५-१५६. **शिट षिट अनादरे–**
शेटति सेटति वा विद्वान् मूर्खम्।
रौट्ट इत्यपरे।

१५७-१५८. **जट झट संघाते–**
जटतिं झटति वा केशः, अन्योन्यं लग्नीभवतीत्यर्थः, झाटः।

१५९. **भट भृतौ–**
भटति भटान् पटुः स्वामी, पुष्णातीत्यर्थः, भाटः।

१६०. **तट उच्छ्राये–**
तटति तटम्।
उच्छ्रितं भवतीत्यर्थः।

१६१. **खट काङ्क्षे–**
खटति खटां विषयी, आकाङ्क्षतीत्यर्थः, खटः।

१६२. **नट नृतौ–**
प्रनटति।

१६३. **पिट शब्दसंघातयोः–**
पेटति शब्दायते पुञ्जीकरोति वा, पेटकः।

१६४. **हट दीप्तौ–**
हटति हाटकं यत्र कुत्राप्यङ्गे।

१६५. **षट अवयवे–**
सटति पटः अवयवीभवतीत्यर्थः, सटा।

१६६. **लुट विलोटने–**
लोटति भूमौ भट: संग्रामे।

१६७. **चिट प्रेष्ये–**
चेटति चेटीं गृही।

१६८. **विट शब्दे–**
वेटति वटु:, रौतीत्यर्थ:, वेट:।

१६९. **विड आक्रोशे–**
वेडति प्रतिवेशिनीं मुखरा, विडाल:।

१७०-१७५. **अट पट कट किट इट इ गतौ–**
अटति पटति कटति केटति एटति अयति वाटीं पटु:।

१७६. **मडि भूषायाम्–**
माण्डति मण्ड:, मण्डूक:।

१७७. **कुडि वैकल्ये–**
कुण्डति कुवक्तारं सभासद:, कुण्डम्।

१७८. **मुट प्रमर्दने–**
मोटति महिला देहम्।
पुडीत्येके यस्य पुण्डरीकं पुण्ड्रकम्।

१७८. **चुट अल्पीभावे–**
चोटति सरसी निदाघे।

१८०. **मुडि खण्डने–**
मुण्डति मुण्डं नापित:। सामान्यपठितोऽपि लोमापनयने।
सामान्ये मुण्डति केशान्।

१८१. **वटि विभाजने–**
वण्टति धनमन्योन्यं भ्रातर:।

१८२-१८३. **रुटि लुटि स्तेये–**
रुण्टति लुण्टति वा कटक: परराष्ट्रम्।

१८४. **स्फुटिर् विसरणे**–विसरणमिह विकास:–
स्फोटति धाना भ्राष्ट्रे।

विशरणमिह तालव्यमध्यं पठित्वा विदारणार्थमनुमानयन्ति
स्फोटति गात्रं विषाणेन विषाणी।

१८५. **पठ व्यक्तायां वाचि**–
पठति बालः पुस्तकं, पाठः।

१८६. **वठ स्थौल्ये**–स्थौल्यमत्र सामर्थ्यं–
वठति वीरः संग्रामाय।

१८७. **मठ निवासे**–
मठति मठे भिक्षुकः।

१८८. **कठ कृच्छ्रजीवने**–
कठति कठो भिक्षया।

१८९. **रठ परिभाषणे**–
रठति शठः प्रचुरम्।
भेदेन पाठोऽस्य ठकारप्रस्तावात्।

१९०. **हठ बलात्कारे**–
हठति बलं परेषां, हठात्।

१९१-१९२. **रुठ लुठ उपघाते**–
रोठति लोठति वा भटो रणभूमौ रिपुम्।

१९३. **पिठ हिंसासंक्लेशयोः**–
पेठति मण्डं पामरः, पिठरः।

१९४. **शठ कैतवे च**–कैतवमिह वञ्चनं, चकारोऽत्र
प्रकृतार्थद्वयकर्षणार्थः।
शठति शठो भृत्यः स्वामिनम्।

१९५. **शुठ गतिप्रतिघाते**–
शोठति सेतुना पयसां रयः।

१९६-१९७. **कुठि लुठि आलस्ये च**–आलस्यं मन्दीभवनम्।
कुण्ठति लुण्ठति वा परशुः पाषाणे।

१९८. **शुठि शोषणे**–
शुण्ठति शुण्ठं बहिरातपेन।

१९९-२००. **रुठि लुठि गतौ–**
रुण्ठति लुण्ठति वा तीर्थं वृद्ध:।
पुनर्लुठि: पठितोऽर्थभेदात्, न पठन्ति चैके।

२०१. **चुद्ड हावकरणे–**
हावकरणमिह भावसूचनम्।
चुड्डति चार्वङ्गी यूनामवलोकनेन।

२०२. **अद्ड अभियोगे–**
अभियोग: समाधानम्।अड्डति परपक्षं स्वप्रतिभया।

२०३. **कीड़ विहारे–**
कीडति नृपतिरवरोधै:।

२०४. **अड उद्यमे–**
अडति युद्धाय भट:।रूढौ व्याड:, व्याल:।

२०५. **लड विलासे–**
लडति ललति वा बाला वासगृहे।

२०६. **कड मदे–**
कडति मदिरया यवन:।

२०७. **कद्ड कार्कश्ये–**
कड्डति कर: केतकपरागै:।
दोपधत्वात् कत्, अन्ये तु कट्।

२०८. **गडि वदनैकदेशे–**
द्रव्ये धातोरवृत्तिरिति वदनैकदेशकर्तृके कार्कश्ये वर्तते। गण्डति कपोलो लोध्ररजसा इति केचित्, अन्ये तु गण्ड इत्यादिकृदुत्पत्तये धातुत्वार्थमिति।

२०९. **गुपू रक्षणे–**
गोपायति गां गोपालक:।

२१०-२११. **तप धूप सन्तापे–**
तपति धूपायति वा धूमकेतु:।

२१२-२१४. **रप लप जल्प व्यक्तायां वाचि–**

रपति लपति जल्पति वा यथेष्टभाषी।

२१५. **जप मानसे च**–मानसं वचनं अव्यक्तवचनम्।

चकाराद् व्यक्तवचनं च–जपति मन्त्रं मान्त्रिक:।

२१६. **चप सान्त्वने**–

सान्त्वनमुपशम: प्रियवचनं वा–

चपति विवेकी कुशलवचसा सर्वजनम्, रूढौ चाप:।

२१७. **षप समवाये**–

सपति तन्तुषु पट:, साप:।

२१८. **चुप मन्दायां गतौ**–गतिरिह प्रेरणम्।

चोपति गले दुर्विनीतं नृपति:।

कर्मणि वुण् दृश्यते, गलेचोपक:।

२१९-२२९. **तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ षृभु षृम्भु भर्ब हिंसार्था:**–

तोपति तुम्पति त्रोपति त्रुम्पति तोफति तुम्फति त्रोफति त्रुम्फति सर्भति सृम्भति भर्बति वा वर्त्मनि स्थितं वृषभ:।

२३०. **शुम्भ भाषणे च**–

शुम्भति स्म शुम्भो देववाहिनीम्।

चकारो हिंसानुकर्षणार्थ:।

२३१-२४१. **वर्फ रफ रफि पर्ब बर्ब मर्ब कर्ब खर्ब गर्ब (लर्ब?) सर्ब चर्ब गतौ**–

वर्फति रफति रम्फति पर्बति बर्बति मर्बति कर्बति खर्बति गर्बति सर्बति चर्बति वा ग्रामं पथिक:।चर्ब अदनार्थोऽपि।

२४२-२४३. **अर्ब शर्ब हिसायां च**–चकाराद् गतावपि

अर्बति शर्बति वा वैरिणं पटुर्भट:।

रूढौ अर्बा अश्व:, शर्ब: शिव:।

२४४. **कुबि छादने**–

कुम्बति कुटीं कर्मकर:।

कुम्बा यज्ञभूमेरावरणम्।

२४५-२४६. लुबि तुबि अर्दने–
लुम्बति तुम्बति वा कम्बली वृषभान्तरम्।
तुम्बी अलाबूः।

२४७. चुबि वक्त्रसंयोगे–
संयोग इह संयोजनम्।

२४८-२५६. अण रण वण मण कण क्वण ष्टन वन ध्वन शब्दे–
अणतीत्यादि, कणो, रेणुः, रणः।

२५७. ओणृ अपनयने–
ओणति चौरः परद्रव्यं, मां भवान् ओणिणत्।

२५८. शोणृ वर्णगत्योः–
वर्ण इह लोहितीभावः–
शोणति पद्मम्।

२५९-२६०. हुडृ होडृ गतौ–
होडति हौडति हट्टं वणिक्।

२६१. रोडृ अनादरे–
रोडति दरिद्रं धनिकः।

२६२. लोडृ उन्मादने–
लोडति लिङ्गं यौवनावस्थायाम्।

२६३. कनी दीप्तिकान्तिगतिषु–
कनति दीपः। कनति प्रौढा। कनति बालः विद्यालयम्।

२६४. षण संभक्तौ–
सनति मित्रं साधुः।

२६५-२६९. चमु छमु जमु झमु जिमु अदने–
चमति छमति जमति झमति जेमति वा अन्नं बुभुक्षितः।
चमेराङि प्रायेण प्रयोगः।

२७०. क्रमु पादविक्षेपे–
क्रामति त्रिविक्रमस्त्रिभुवनम्।

२७१. **यम उपरमे–**
उपरमो निवृत्तिः–यच्छति मत्स्यभक्षणाद् विज्ञः।
प्रपूर्वो दाने–नृपः ब्राह्मणाय धनं प्रयच्छति।
उपपूर्वो विवाहे–युवकः युवतीम् उपयच्छति।

२७२. **णम प्रह्वत्वे शब्दे–**
प्रणमति गुरुं शिष्यः, स्वयं नमते पल्लवः।
शब्दार्थो न भाषायाम्।
उपपूर्वः प्राप्तौ–उपनमति नीतिभाजनं सम्पत्।

२७३-२७७. **अम द्रम हम्म मीमृ हय गतौ–**
अमति द्रमति वा ग्रामं पथिकः।
हम्म मीमृ इत्येतौ शब्देऽपि–हम्मति गौः, मीमतिः गजः, हयति हयः।

२७८. **हर्य क्रा (का?) न्तौ–चकाराद् गतौ–**
हर्यति हरिणो मरुदेशे।

२७९-२८०. **मव्य मव बन्धने–**
मव्यति बन्दिनं कारागारिकः।मव्यादयो द्वियकाराः।

२८१-२८३. **षूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः–**
सूर्क्ष्यति ईर्क्ष्यति ईर्ष्यति वा सपत्नीं वधूः।

२८४-२८५. **शुच्यी चुच्यी अभिषवे–**
शुच्यति चुच्यति मदिरां शौण्डिकः, शुक्तः, चुक्रोऽम्ल इति रूढौ।

२८६-२८७. **दल ञिफला विशरणे–**
विशरणमिह विभेदे–दलति फलति वा हृदयं कामज्वरः।
पत्रफलयोरुद्गमे वा–दलति फलति वा शाखा वसन्ते।
रूढौ दाडिमं, दद्दालः, कुद्दालः।

२८८-२९०. **मील स्मील क्ष्मील निमेषणे–**
निमेषणमिह चक्षुषः पक्ष्मभिरावरणं–
निमीलति स्मीलति क्ष्मीलति नयनं निद्रालुः।

उत्पूर्व उन्मेषणे–उन्मीलति नयने प्रबुद्धः।

२९१. **पील प्रतिष्टम्भे–**

प्रतिष्टम्भ इह धारणं–पीलति स्तम्भो गृहं, पीलुः।

२९२. **णील वर्णे–**

वर्ण इह वर्णविशेषस्य उत्पत्तिः आपादनं वा–
नीलति कन्यायाः कुन्तलः, नीलति तन्तून् तन्तुवायो नील्या इति वा।

२९३. **शील समाधौ–**

समाधिः सेवा स्वभावेन प्रवृत्तिर्वा–
शीलति पुण्यं सुशीलः।

२९४. **कील बन्धे–**

कीलति कपिलां कीले गोपालकः।

२९५. **कूल आवरणे–**

कूलति कूलं जलं नद्याः।
अनुप्रतिपूर्वोऽयं प्रीणनाप्रीणनयोः।

२९६. **शूल रुजायाम्–**

शूलति शूलः कदन्नभोजिनम्।

२९७. **तूल निष्कर्षे–**

निष्कर्ष इह युक्तपरिच्छेदः–
तूलति सुवर्णं वणिक्।

२९८. **पुल संघाते–**

पूलति तृणानि वात्या।
पूलो ग्रासे रूढः।

२९९. **मूल प्रतिष्ठायाम्–**

मूलति शूरो युद्धे।

३००. **फल निष्पत्तौ–**

फलति फलं शाखिषु।
फलति शुभाशुभं सर्वसम्पदमिति निष्पादनेऽपि।

३०१. **चुल हावकरणे–**
हावकरणमिह भावसूचनं–
चुल्लति लावण्यवति प्रतिहारजनं, चुल्ली।

३०२. **फुल्ल विकसने–**
फुल्लति कुसुमं वसन्ते।

३०३. **चिल्ल शैथिल्ये–**
चिल्लति चेलं भारवत्या वल्लभालिंगनेन।
आततायिनि पक्षिणि चिल्लः।

३०४–३१४. **वेलृ चेलृ केलृ खेलृ क्वेलृ पेलृ फेलृ शेलृ वेल्ल षल तिल गतौ–**
वेलति चेलति केलति खेलति क्वेलति पेलति फेलति शेलति वेल्लति सलति तेलति वियति चिल्लः।
रूढौ वेला तीरे, चेलं वसने, केलिः क्रीडायां, फेला भुक्तसमुज्झिते, सालो वृक्षे, सलिलं जले।

३१५. **खल चलने–**
खलति खलः स्वाङ्गीकृतसङ्गताम्।

३१६. **स्खल सञ्चये च–**
चलनमपेक्ष्य चकारः। स्खलति कुसुमं मालाकारः सञ्चिनोतीत्यर्थः। स्खलति धर्मपथादविनीतः।

३१७. **गल अदने–**
अनेकार्थत्वात् स्रंसनेऽपि–
गलति पूलं वारणः, गलति तैलं तैलपात्रात्।

३१८–३१९. **शल श्वल्ल आशुगतौ–**
शलति श्वल्लति वा रणभूमौ तुरगः।
रूढौ शल्लकी वृक्षविशेषे।

३२०–३२१. **खोडृ खोलृ गतिप्रतीघाते–**
खोडति खोलति वा शिल्पवान् अशिक्षितं चित्रीकरणे।
डलयोरेकत्वं, तदा खोलृग्रहणं स्वरूपाविर्भावार्थम्।
खोडः खञ्जे।

३२२. धोर्ऋ गतिचातुर्ये–

धोरति करिणी सलिलम्, आधोरणा हस्तिपका:।

३२३. त्सर छद्मगतौ–

त्सरति पारदारिको युवतिसन्निधानं, व्याजेन व्रजतीत्यर्थ:, त्सरु:।

३२४. क्मर हूर्छने–

क्मरति भुजगी तप्तसैकते, आकुलं गच्छतीत्यर्थ:।

३२५-३३१. अभ्र वभ्र मभ्र चर रिवि रवि धवि गत्यर्था:–

अभ्रति वभ्रति मभ्रति चरति रिण्वति रण्वति धन्वति वियति मेघ:।

अभ्रवभ्रमभ्रां व्यञ्जने रलोपमिच्छन्त्येके, अभ्यते अब्धिरित्यादि। भक्षणे चरिरनेकार्थत्वात्।

३३२-३३३. ष्ठिवु क्षिवु निरसने–

ष्ठीवति क्षेवति वा वधू: श्लेष्माणम्।

३३४. जि जये–

जयोऽत्रोत्कर्ष: अभिभव: स्वीकारो वा–

जयति जिन: सर्वोत्कृष्टो वर्तत इत्यर्थ:।

जयति शत्रून् अभिभवतीत्यर्थ:,

जयति धनं द्यूतेन कितव:, स्वीकरोतीत्यर्थ:।

पञ्चम्या: (का. ३.१.१८.) प्रथमपुरुषस्यानभिधानात् ति-तस्-अन्तीनामेव प्रयोग:। इनि जापयति, सनि जिगीषति चेक्रीयिते जेगीयते तल्लुकि जेजेति जेजयीति।

३३५. जीव बलप्राणधारणे–

बलमतिशक्तिता, प्राणो नासावायु: तयोर्धारणम्।

जीवति चिरं योगपरायण:। जीवातुर्जीवनौषधम्।

३३६-३३९. पीव मीव तीव नीव स्थौल्ये–

पीवति मीवति तीवति नीवति दध्ना वणिक्, पीवर:, नीवि:।

३४०-३४४. **उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः–**
ऊर्वति तूर्वति थूर्वति दूर्वति धूर्वति बलवान् दुर्बलं, हिनस्तीत्यर्थः।

३४५-३४६. **मुर्वी मव बन्धने–**
मूर्वति मवति वा दस्युं राजा।

३४७. **गुर्वी उद्यमे–**
गूर्वति पत्तिरसिं, गूः, गुरौ, गूर्णः।

३४८-३५०. **पूर्व पर्व मर्व पूरणे–**
पूर्वति पर्वति मर्वति वा घटं जलेन भृतकः।

३५१. **चर्व अदने–**
चर्वति चविकं पक्षी।

३५२-३५४. **कर्व खर्व गर्व दर्पे–**
कर्वति खर्वति गर्वति दानवो वरदानतः। स्वर्व ह्रस्वभवने अनेकार्थत्वात्। पुर्वादीनां वकारोऽन्तःस्थो वा।

३५५-३५७. **पिबि मिबि णिबि सेचने–**
पिम्बति मिम्बति निम्बति वा वृक्षान् धाराभिः पयोधरः।
केचिदपवर्गोऽयं वकार इति नस्य नानुस्वारः पिन्वति मिन्वति निन्वति इत्याचक्षते।

३५८-३६०. **हिबि दिबि जिबि प्रीणनार्थाः–**
हिम्बति दिम्बति जिम्बति वा पितृन् गृहस्थः।
हिन्वतीत्यादि केचित्।

३६१-३६२. **अव रक्ष पालने–**
अवति रक्षति वा राष्ट्रं विनेता।
सनि अविविषति, मन् ओम्।

३६३. **इवि व्याप्तौ–**
इम्बति इन्वति वा वन्या निम्नदेशम्।

३६४. **अक्षू सङ्घाते च–**
चकाराद् व्याप्तौ च। अक्षति अक्षौहिणीं सेनापतिः, समूहयतीत्यर्थः।

अक्षति क्षणचलमन्धकारो। रजन्यां, व्याप्नोतीत्यर्थः।

३६५. **घुषिर् शब्दे–**

घोषति शिशुः पट्टिकाम्।

३६६-३६७. **तक्षू त्वक्षू तनूकरणे–**

तक्षति त्वक्षति वा काष्ठं काष्ठतट्।

३६८. **णिक्ष चुम्बने–**

निक्षति कपोले कामिनीं कामुकः।

३६९-३७१. **तृक्ष ष्टृक्ष णक्ष गतौ–**

तृक्षति स्तृक्षति नक्षति वा लक्ष्यं शरः।

३७२. **वक्ष रोषे–**

वक्षति रामः स्वरिपुवचसा, वक्षः।

३७३. **षूर्क्ष अनादरे–**

सूर्क्षति दरिद्रं गणिका।

३७४-३७६. **काक्षि वाक्षि माक्षि काङ्क्षायाम्–**

काङ्क्षा वाञ्छा। काङ्क्षति, वाङ्क्षति, माङ्क्षति।

३७७-३७९. **द्राक्षि ध्राक्षि ध्माक्षि घोरवाशिते च–**

द्राङ्क्षति ध्राङ्क्षति ध्माङ्क्षति ध्माङ्क्षो विसदृशं मध्याह्ने।

पक्ष परिग्रह इत्येके यस्य पक्षतिः पक्षः।

३८०. **चूष पाने–**

चूषति चषकं क्षीवः।

३८१. **तूष तुष्टौ–**

तूषति ताम्बूलेन।

३८२. **पूष वृद्धौ–**

पूषति पौषरजनी, पूषा।

३८३. **मूष स्तेये–**

मूषति मूषिकः कुशूलाद् धान्यम्।

स्तेयमपनयनं–मुष इति कश्चित् मोषति।

३८४. **षूष प्रसवे–**

सूषति कुमारम्।

३८५-३८६. तसि भूष अलंकारे–

तंसति भूषति कन्यां जननी। एकार्थत्वात् तंसेरिह दन्त्यान्तस्य पाठ:।

कश्चिन्मूर्धन्यान्तमेवामुं पठति–भूषा तंसा।

३८७. **ऊष रुजायाम्–**

ऊषति दुर्वचसा साधुहृदयं, ऊष्मा, ऊषर:।

३८८. **ईष उञ्छे–**

ईषति धान्यं वृत्तिकर्षित:।

३८९. **कृष विलेखने–**

कर्षति भूमिं हलेन कृषिक:।

३९०-३९९. कष शिष जष झष वष मष रुष रिष जूष झूष हिंसार्था:–

कषति सर्वं खल: शेषतीत्यादि।

४००. **भष भर्त्सने–**

भषति श्वा भिक्षुम्।

भर्त्सनमिह शब्दविशेष:, शब्देन निर्भर्त्सयतीत्यर्थ:।

४०१-४०७. जिषु णिषु विषु मिषु पृषु वृषु उक्ष सेचने–

जेषति शिखरं पयोधर:।

नेषतीत्यादि, वर्षा, उक्षा।

४०८. **मृषु सहने च–**

चकारात् सेचने।

मर्षति स्वामी सेवकापराधम्।

४०९. **पुष पुष्टौ–**

पोषति पोष्यं गृहस्थ:।

४१०-४१४. श्रिषु श्लिषु प्रुषु प्लुषु उष दाहे–

श्रेषति मांसम् आखेटक:।

केचिदुषिं उदनुबन्धं पठन्ति।

४१५. **घृषु संघर्षे–**

घर्षति चन्दनमिन्दुमुखी शिलायाम्।

४१६. **हृषु आलोक्ये–**

आलोक्यमिह चित्तोच्छ्वासमात्रे–

हृष्टाः हृषिताःउच्छ्वसिता इत्यर्थः।

४१७-४२०. **तुस ह्रस ह्लस रस शब्दे–**

तोसति शरदि हंसः, ह्रस्वः।

४२१. **लस श्लेषणक्रीडनयोः–**

लसति विलासी युवतिभिः।

४२२-४२४. **जर्च चर्च झर्झ परिभाषणतर्जनयोः–**

जर्चति चेटां गृहिणी।

चर्चा लेपः, चर्चिका देवी, झर्झरी वाद्यविशेषः।

४२५. **हस हसने–**

हसनमिहापूर्वप्रतीत्या कपोलविकासः, तन्मात्रे वर्तमानोऽयमकर्मकः।

यदा कस्यचिदाक्षारणामुद्दिश्य तद्भवति तदा सकर्मको जायते, यथा काश्यां कौतुकेन हसति पारदारिकं कुमारः।

४२६. **णिश समाधौ–**

प्रणेशति सुरतं निशा।

४२७-४२८. **मिश मश शब्दे रोषे च–**

मेशति मशति वा मशकः।

४२९-४३१. **शव पिसृ पेसृ गतौ–**

शवति पेसति वा परलोकं मृतः।

४३२. **शश प्लुतगतौ–**

प्लुतेन गतिस्तत्र। शशति शशः।

४३३. **शसु हिंसायाम्–**

शसति शूरः शूरम्।

४३४. **शन्सु स्तुतौ, चकाराद् हिंसायाम्–**

शंसति प्रियं प्रायेण जनः।

४३५. **मिह सेचने–**

मेहति मेघः प्रदीप्तं वनम्।

४३६. दह भस्मीकरणे–

दहति वनं दावः, निदाघः।

४३७. चह परिकल्कने–

परिकल्कनमिह शाठ्यं–चहति शठः सदाशयं वञ्चयतीत्यर्थः।

हान्तस्य सिचि न दीर्घः, अचहीत्।

४३८. रह त्यागे–

रहति विरही सङ्गसुखम्।

४३९. रहि गतौ–

रंहति वातः, रंहः।

४४०-४४१. तृ (दृ?) हि बृहि वृद्धौ–

तृं (दृं?) हति बृंहति वा वर्हं वर्षासु।

४४२. बृहिर् शब्दे च–

चकाराद् वृद्धौ बर्हति वलाहकः प्रावृषि। अस्मिन् धातौ पठ्यमानेबृंहेः स्वरे (का. ४.१.६८) इति सूत्रं ज्ञापयति वृद्धौ अर्थे व्यञ्जनादाविटि चास्य प्रयोगो नास्तीति।

शर्ववर्मणो मते बृहिर्नास्त्येव।

तन्मतेऽद्यतन्यां प्रयोगसिद्धिर्दुरुपपादा स्यात्।

४४३-४४४. तुहिर् दुहिर् अर्दने–

तोहति दोहति वा आतुरं रुजा।

४४५-४४६. अर्ह मह पूजायां–

अर्हति महति वा मान्यं महाशयः।

४४७. ग्लै हर्षक्षये–

ग्लायति रोगेणापटुः।

४४८. म्लै गात्रविनामे–

विनामो वैपरीत्यम्। म्लायति माला प्रभाते भोगिनाम्।

४४९. द्यै न्यक्करणे–

न्यक्करणं तिरस्करणम्। द्यायति तोमरेण वीरः परचक्रं, द्यानः।

४५०. **द्रै स्वप्ने–**
निद्रायति दिवा दुर्नयः।

४५१. **ध्रै तृप्तौ–**
ध्रायति लाभेन वणिक्।

४५२-४५४. **कै गै रै शब्दे–**
कायति काकः, गायति गायकः, रायति रासभः।

४५५-४५६. **ष्ट्यै स्त्यै शब्दसंघाते–**
ष्ट्यायति स्त्यायति तटे टिट्टिभः, एकत्र समूहीभवतीत्यर्थः।
धात्वादेः षः सो न भवति उभयोपादानात्।

४५७. **खै खदने–**
खदनमिह हिंसा–खायति खलः साधुम्।

४५८-४६०. **क्षै जै षै क्षये–**
क्षायति जायति सायति वा कुल्या निदाघे।

४६१-४६२. **श्रै स्त्रै पाके–**
श्रायति स्त्रायति वा घृतमाभीरी।

४६३-४६४. **पै ओवै शोषणे–**
पायति वायति वा व्राहिरङ्गने।

४६५. **ष्टै वेष्टने–**
स्तायति वास्तु वास्तविकः।

४६६. **दैप् शोधने–**
दायति ताम्रमम्लेन स्नातकः। कर्मणि दायते।

४६७-४६८. **धेट् पा पाने–**
धयति पिबति वा पानीयं पिपासुः।

४६९. **घ्रा गन्धोपादाने–**
गन्धोपादानं गन्धग्रहणं उपदीयमानगन्धकरणं वा।
जिघ्रति गन्धं पुष्पं वा।

४७०. **ध्मा शब्दाग्निसंयोगयोः–**
सशब्दीकरणे संयुज्यमानाग्नीकरणे च–
शङ्खं धमति, धमति कलधौतं कलादः।

४७१. **ष्ठा गतिनिवृत्तौ–**
तिष्ठति सौष्ठवं पटिष्ठे। प्रपूर्वो गतौ-प्रतिष्ठति
आङ्पूर्व आरोहणे–आतिष्ठति हस्तिनम्।
अधिपूर्व आधारकर्मके अधितिष्ठति।

४७२. **म्ना अभ्यासे–**
अभ्यास: पौन:पुन्यं–
मनति मनस्वी मनूक्तवचनम्।

४७३. **दाण् दाने–**
यच्छति दानं द्विजाय।

४७४. **ह्वृ कौटिल्ये–**
ह्वरति भ्रुवौ कामिनी।

४७५. **स्वृ शब्दोपतापयोः–**
स्वरति संग्रामे सामन्त: शब्दायते उपतपति वा इत्यर्थ:।

४७६-४७७. **स्मृ ध्यै चिन्तायाम्–**
स्मरति ध्यायति रामं रामस्य वा।

४७८. **द्वृ धा (व?) रणे–**
द्वरति द्वारे दत्तं दौवारिक:।

४७९. **षृ गतौ–**
जवातिधाने सरतिप्रयोगनिरासार्थं धावादेश:, धावति तुरङ्गेण समं पदाति:।
अन्यत्र-सरति रन्तुमभिसारिका सङ्केतनिकेतने।

४८०. **ऋ प्रापणे च–**
चकाराद् गतौ–
ऋच्छति संतप्त:, ऋच्छति भारं ग्रामं भारिक:।

४८१-४८२. **गृ घृ सेचने–**
गरति तरुं पयसा पयोधर:।
घरतेस्तु घृतं घर्म घृणा इत्येव प्रयोग:।
अन्ये तु घृ पूरणे इति चुरादौ अस्य पाठ:
मस्तिष्काक्तवशाभिघारित इत्यादिप्रयोग:।

४८३. **ध्वृ हूर्छने–**
ध्वरति धियं न धुरीणः।

४८४. **श्रु श्रवणे–**
शृणोति सूक्तानि सज्जनः।

४८५-४९१. **षु स्रु दु द्रु ऋछ गम्लृ सृप्लृ गतौ–**
गतिरिह उत्तरदेशसंयोगफलकव्यापारः–
सवति स्रवति दवति द्रवति ऋच्छति गच्छति सपति वा ग्रामं प्रवासी।

४९२. **ञिक्ष्विदा अव्यक्ते शब्दे–**
क्ष्वेदति खे पक्षी।

४९३. **स्कन्दिर् गतिशोषणयोः–**
स्कन्दति निदाघे तडागः।

४९४. **यभ मैथुने–**
मैथुनमिह रतं–यभति युवतिम्। यभिरित्येके–यम्भति।

४९५. **तृ प्लवनतरणयोः–**
प्लवनं मज्जनाभावः, तरणमाक्रमणं पारगमनं वा–
तरति नद्यां न मज्जतीत्यर्थः;
तरति नावा नदीं वणिक्, आक्रामतीत्यर्थः।

४९६. **षु प्रसवे–**
प्रसवो गर्भमोचनं–प्रसवति पोतं प्रसूः।

४९७. **ध्रु स्थैर्ये–**
ध्रवति धरा चिराय, ध्रुवः।

४९८. **ज्रि अभिभवे–**
ज्रयति जटयमाजौ, जैत्रः।

४९९. **त्यज हानौ–**
त्यजति गृहं विरक्तः।

५००. **षन्ज सङ्गे–**
प्रसजति युवतिषु कामभावः।

५०१. **दृशिर् प्रेक्षणे–**
पश्यति पार्वणमिन्दुमुखी।

५०२. **दन्श दंशने–**
दशति सर्पोऽल्पायुषम्।

५०३. **कित निवासे रोगापयने च–**
चकारोऽनुक्तसमुच्चये, तेन संशयेऽपि। निवासार्थस्य त्यादौ प्रयोगो नास्ति सङ्केतनिकेतनमित्याद्येव।
चिकित्सति भिषगातुरम्, अपनीतरोगं करोतीत्यर्थः।
संशये–विचिकित्सति मे मनः॥

परस्मैभाषाः।

परस्मैपदे भाषा उक्तिर्येषामिति पद शब्दलोपो लोकोपचारात्।

१. **एध वृद्धौ–**
एधते विधुः।

२. **स्पर्ध संघर्षे–**
संघर्षः परिभवेच्छा–
स्पर्धतेऽधिगुणमभिमानी।

३. **गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च–**
प्रतिष्ठार्थे- गाधते तीर्थे धार्मिकः,
लिप्सार्थे- गाधते धनं लुब्धः, ग्रन्थे-गाधते मालां मालिकः।
चेक्रीयिते जागाध्यते, तल्लुकि जागाद्धि जागाधीति।

४. **बाधृ विलोडने**–विलोडनमिह व्यथनं उपघातो वा–
बाधते विधिमुत्सर्गः।

५. **दध धारणे–**
दधते धन्यस्य शुभं फलं धर्मः।

६. **स्कदि आप्लवने–**
आप्लपवनमिह क्षरणम्।
स्कन्दते रेतो यौवनमदमत्तस्य विरहेण स्वप्ने।

७. **श्विदि शैत्ये–**
श्विन्दते हिम-ऋतौ मारुतः, शीतलीभवतीत्यर्थः।

८. **वदि अभिवादनस्तुत्योः–**

वन्दते कृष्णं वैष्णवः।

९. **भदि कल्याणे सौख्ये च–**

कल्याणीभवने सुखीभवने चेत्यर्थः–

भन्दते भवनेषु भाग्यवान्।

१०. **मदि स्तुतिमोदमदस्वप्नगतिषु–**

मन्दते मन्दिरे मन्दमतिः, स्तौति मोदते माद्यति स्वपिति गच्छति वेत्यर्थः, मन्दारः, मन्दरः।

ûû- **स्पदि किञ्चिच्चलने–**

स्पन्दते चक्षुर्भाविकुशलस्य दक्षिणम्।

१२. **क्लिदि परिदेवने–**

क्लिन्दते प्रतिदिनं दरिद्रः।

क्लिन्दतीति परस्मैपदिषु पाठात्। उभयपदिषु पाठमनादृत्य उभयत्र पाठः परप्रसिद्ध्यैव। परो हि स्वरितञितां फलवत्कर्तर्यात्मनेपदं, अन्यत्र परस्मैपदम्। अस्य तु स्वरितत्वाभावात् फलवत्यपि परस्मैपदं, अफलवत्यात्मनेपदं प्रतिपद्यते।

१३. **मुद हर्षे**–हर्षश्चित्तोन्मादः–

मोदते मुदिनी बान्धवोदये दयितसन्निधौ युवती।

१४. **दद दाने–**

ददते धनं दरिद्राय सात्त्विकः।

१५. **हद पुरीषोत्सर्गे–**

हदते बहुधा अतिसारकी विट्कर्मकश्च।

१६-१८. **ष्वद स्वाद स्वर्द आस्वादने–**

आस्वादनमिह रसोपादानं प्रीणनं च–

स्वदते स्वादते वा शर्करां तरुणः, स्वदते शर्करा तरुणाय।

१९. **ऊर्द माने क्रीडायां च–**

चकारादास्वादनेऽपि–

ऊर्दते केदारं नलेन केदारिकः,
ऊर्दतेऽक्षैः कितवः,
ऊर्दते दर्दुरी मक्षिकाम्।

२०-२२. **कुर्द खुर्द गुद क्रीडायामेव–**
एवकारोऽयमनेकार्था धातव इति ज्ञापयति–
कुर्दते खुर्दते गुदते वा गोपीभिर्गोविन्दः, गुदम्।

२३. **सूद क्षणने–**
क्षणनमवदारणं हिंसापलक्षणम्–
सूदते मधुसूदनो दैत्यम्।

२४. **ह्रद अव्यक्ते शब्दे–**
ह्रादते दुन्दुभिः।
ह्रदः स्वभ्रे, संज्ञात्वात् ह्रस्वः।

२५. **ह्लादी सुखे च–**
चकारात् शब्दे, सुखे सुखक्रियायाम्–
ह्लादतेऽतलस्पर्शः पितरम्।

२६. **पर्द कुत्सिते शब्दे–**
पर्दते गुरुभोजी जडः।

२७. **यती प्रयत्ने–**
यतते तपः कर्तुं तपस्वी।

२८-२९. **युतृ जुतृ भाषणे–**
योतते जोतते वा वचनं वाग्मी।

३०-३१. **विथृ वेथृ याचने–**
वेथति वित्तानि वदान्यं दीनः।
विथपाठोऽत्रागुणार्थः, विथ्यते वेथ्यते।

३२-३३. **नाथृ नाधृ उपतापैश्वर्याशीःषु च–**
चकाराद् याचने च–नाथति रिपुम् उपतापयतीत्यर्थः।
नाथति स्म पाञ्चालेषु द्रुपदः।
नाधते सर्पिः, सर्पिर्मे भूयादित्याशास्त इत्यर्थः,
नाधते पथिको भिक्षां याचत इत्यर्थः।

आशिषि नाथ इति नियमात् सर्पिषो नाथते इत्यात्मनेपदम्, अन्यत्र परस्मैपदं। प्रनाथते प्रनाधते।
न णत्वं अणोपदेशत्वात्।

३४. **श्रथि शैथिल्ये–**
शिथिलभावे शिथिलभावनायां च–
श्रन्थते वसनं भावे कामिन्याः, शिथिलं भवतीत्यर्थः।
श्रन्थते वसनं कामुकः कामिन्याः।

३५-३६. **ग्रथि वकि कौटिल्ये–**
ग्रन्थते वङ्कते कुटिलं भवतीत्यर्थः, कुटिलं करोति वा।

३७. **कत्थ श्लाघायाम्–**
विकत्थते आत्मानमभिमानी।

३८. **शीकृ सेचने–**
शीकते सलिलं शैक्यस्था (शीकते कलसीं पयसा दासः)।

३९-४०. **लोकृ लोचृ दर्शने–**
लोकते लोचते वा चन्द्रं चारुमुखी।

४१. **श्लोकृ संघाते–**
आनुपूर्व्या पदानां ग्रन्थनमिह संघातः।
श्लोकते कविः।

४२-४३. **द्रेकृ ध्रेकृ शब्दोत्साहयोः–**
द्रेकते ध्रेकते वा कोकिलो वसन्ते, शब्दायते उत्सहते वा इत्यर्थः।

४४-४५. **रेकृ शकि शङ्कायाम्–**
शङ्का इह भयं संशय आरोपो वा।
रेकते शङ्कते वा कुटिलात् सुजनः।

४६. **अकि लक्षणे–**
लक्षणे लक्षणयोग्यकरणे।
अङ्कते वृषं गोपालकः।

४७. **मकि मण्डने–**
मङ्कते मुकुटेन मौलिं महिला।

४८. **कक लौल्ये–**
ककते काकी वलिग्रहणे, सतृष्णो भवतीत्यर्थः।

४९-५०. **कुक वृक आदाने–**
कोकते मांसं काकः,
वर्कते पशुं वृकः।

५१. **चक तृप्तौ प्रतीघाते च–**
चकते मित्रं दृष्ट्वा कौतुकी, चकते चिन्तया चकितः।

५२-६९. **ककि वकि श्वकि त्रकि टौकृ त्रौकृ ष्वक्क वस्क (ष्क, रमा) तिकृ टिकृ टीकृ सि (सी, रमा) कृ सेकृ श्रेकृ श्रकि श्लकि रघि लघि गत्यर्थाः–**
कङ्कते वङ्कते श्वङ्कते त्रङ्कते टौकते त्रौकते ष्वक्कते वस्कते (मस्कमप्येके, मस्कते) तेकते टेकते टीकते सेकते (सीकते, रमा) श्रेकते श्रङ्कते श्लङ्कते (अङ्कते इति केचित्) रङ्घते लङ्घते वा जलधिं जालिकः, अङ्क कङ्कः वङ्कः टीका सेका रघुः लघुः।

७०-७१. **अघि वघि गत्याक्षेपे–**
गत्याक्षेपो गतिनिषेधः।
अङ्घते वङ्घते वा तिष्ठतीत्यर्थः।

७२. **मघि कैतवे च–**
चकारात् पूर्वार्थेऽपि (गत्याक्षेपे)।
कैतवमिह कितवक्रिया–मङ्घतेऽक्षैः कितवः।

७३-७४. **राघ लाघ सामर्थ्ये–**
सामर्थ्यमिह समर्थीभवनम्।
राघते लाघते वा मल्लो युद्धे, उल्लाघो निस्तीर्णरोगः।

७५. **द्राघृ आयासे च–**
चकारात् पूर्वस्मिन्नपि (सामर्थ्ये), द्राघते पथिकः खिद्यतीत्यर्थः।

७६. **श्लाघृ कथने–**
कथनमिह प्रशस्यकृत्यकथनम्।
श्लाघते गुणवन्तं साधुः।

७७. **षच सेचने–**
सचते कल्पतरुं वास्तविक:।

७८. **शच व्यक्तायां वाचि–**
शचति रुचिरं सती (सची) सुरपतिम्।

७९. **कच बन्धने–**
कचते कचं कुमारी, काच:।

८०-८१. **मच मुचि कल्कने–**
कल्कनमिह दम्भ: शाठ्यमित्यपरे–
मचते शठ:, दम्भं करोतीत्यर्थ:।

८२. **मचि धारणोच्छ्रायपूजनेषु–**
मञ्चते मञ्चं, किञ्चिद् धारयतीत्यर्थ:।

८३. **पच व्यक्तीकरणे–**
पचते पञ्चिकां, वृत्त्यर्थं व्यक्तीकरोतीत्यर्थ:।
केचिदिदमेव इदनुबन्धं पठन्ति।

८४. **ष्णुच प्रसादे–**
स्नोचते तोयं शरदि, प्रसन्नीभवतीत्यर्थ:।

८५-९०. **श्वच श्वचि ईज ईजि वीज ऋज गतौ–**
श्वचते श्वञ्चते ईजते ईञ्जते वीजते अर्जते वा ऋजुपथेन पथिकस्तीर्थं, विवीजे आनृजे।

९१-९२. **ऋजि भृजी भर्जने–**
भर्जनं पाकविशेष:–ऋञ्जते भर्जते वा निम्बपत्रम्।

९३-९७. **वर्च कचि एजृ भ्रेजृ भ्राजृ दीप्तौ–**
वर्चते कञ्चते एजते भ्रेजते भ्राजते वा काञ्चनं, काञ्ची। वर्चिर्बन्धनेऽपि केचित्। टुभ्राज दीप्तौ इति सत्यपि भ्राजे: पुनरिह पाठो राजतेरसहचरितस्याषत्वार्थ:, तेन भ्राक्तिरिति।

९८. **तिज निशाने क्षमायां च–**
तेजते करवालं कर्मकर:।
क्षमायां-तितिक्षते तपस्तपस्वी।

९९. **ष्वन्ज परिष्वङ्गे–**
तुदादिपाठेऽस्यानुषङ्गलोपाकरणं लाघवमपि परमते स्वरभेदानभिनिविष्टचेतसा नोररीकृतम्।
परिष्वङ्ग आलिङ्गनं, परिष्वजते जायां युवा पर्यङ्के।

१००. **अट्त अतिक्रमहिंसयोः टोपधस्तान्तः–**
अट्टते परभटान् अतिवीरः, सनि अटिट्टिषते
क्विपि अत्। तोपधं टान्तं मन्यमाना अतिट्टिषते।

१०१. **घट्ट चलने**–घट्टते घटः।
अनेकार्थत्वात् संसर्गेऽपि–घट्टते वटुः कन्यया।

१०२. **स्फुट विकसने–**
स्फोटते कुसुमं पुष्पोद्याने।

१०३. **चेष्ट चेष्टायाम्–**
चेष्टते वटुरभीष्टं सम्पादयतीत्यर्थः, चेष्टते पठितुं यतत इत्यर्थः।

१०४-१०७. **गोष्ट लोष्ट हुडि पिडि संघाते–**
गोष्टते लोष्टते हुण्डते पिण्डते वा पिण्डदस्तण्डुलानि।
लोष्टः हुण्डा पिण्डं-ण्डी।

१०८. **अठि गतौ–**
अण्ठते पठितुमुपाध्यायगृहं वटुः।

१०९. **हिडि अनादरे च–**
चकाराद् गतौ च–हिण्डते तृणमिव जनमहंकारयुक्तः।

११०. **वठि एकचर्यायाम्–**
वण्ठते वने वण्ठः, अपकर्तुमेकश्चरतीत्यर्थः।

१११. **मठि कठि शोके–**
मण्ठते उत्कण्ठते प्रोषितः प्रियां प्रति।

११२. **मुठि पलायने–**
मुण्ठते मूढः संग्रामात्।

११३. **हेठ विबाधायाम्–** हेठते हालिकमवग्रहः।

११४. **एठ च। चकारः पूर्वापेक्षः–**

एठते कठिनं धनापहः। पृथक्करणं विचित्रार्थम्।

११५. **कुडि दाहे–**

कुण्डते कुण्डीं कुम्भकारः, कुण्डा।

११६-११८. **वडि मडि वेष्ट वेष्टने–**

वण्डते मण्डते वेष्टते वार्टीं वास्तविकः, वण्डः मण्डः।

११९. **भडि परिहासे–**

भण्डते भव्येतरः, भण्डः, भाण्डम्।

१२०. **मुडि मार्जने।** मार्जनमिह शुद्धिः–

मुण्डते मुण्डं जलेन।

१२१. **तुडि तोडने।** तोडनमिह निष्पीडनं–

तुण्डते ताम्बूलं दशनेन, तुण्डम्।

१२२. **भुडि भरणे–**

भरणं पूरणं–

भुण्डते कुण्डं धनेन धनिकः।

१२३. **चडि कोपे–**

चण्डते चण्डिका।

१२४. **शडि रुजायाम्–**

शण्डते शण्डः समरे भटम्। शण्ड संघात इति केचित्।

१२५. **तडि ताडने–**

तण्डते वितण्डायां वादिनं प्रतिभावान्।

१२६. **पडि गतौ–**

पण्डते पण्डितः पुण्यपथम्।

१२७. **कडि मदे–**

मदो हर्षः अनेकार्थत्वात् तुषापनयने च–

कण्डते तण्डुलान् दासी।

१२८. **खडि मन्थे–**

खण्डते दण्डेन भाण्डं कोपनः।

१२९-१३०. **हेडृ होडृ अनादरे–**
हेडते होडते वा हेमानि वितृष्णः।

१३१. **वाडृ आप्लाव्ये।**
आप्लावस्य भाव आप्लाव्यं तरणं–वाडते वडिशदण्डः पानीये, वाडः वालः।

१३२-१३३. **द्राडृ ध्राडृ विशरणे–**
द्राडते ध्राडते वा जलाशये मत्स्यः।

१३४. **शाडृ श्लाघायाम्–**
शाडते आत्मानं दर्पशाली।

१३५-१३६. **तिपृ ष्टेपृ क्षरणार्थौ–**
तेपते स्तेपते घृतं भाण्डात्।

१३७. **तेपृ कम्पने च–**
चकारात् क्षरणे–तेपते शाखावातेन।

१३८. **ग्लेपृ दैन्ये–**
ग्लेपते गुणहीनो गुणिनां सदसि।

१३९-१४०. **टुवेपृ कपि चलने–**
वेपते कम्पते कपीनां हृदयं रावणागमने।

१४१-१४३. **केपृ गेपृ ग्लेपृ च–**
चकारः पूर्वापेक्षः, ग्लेपेरर्थभेदात् पाठः।
केपते गेपते ग्लेपते वा पत्रं मरुत्।

१४४. **त्रपूष् लज्जायाम्–**
त्रपते पतिपार्श्वे अचिरपाणिगृहीती, त्रपा।

१४५. **अबि शब्दे–**
अम्बते अम्बा पुत्रम्। पवर्ग्योऽयं बकारः।

१४६. **लबि अवस्रंसने–**
लम्बतेऽलावूर्नलात्। अवाङ्पूर्वोऽयमाश्रयणे।

१४७. **कबृ वर्णे–**
वर्णे वर्णक्रियायां, वर्णश्चाकारादिः (स्तुतिः, रमा) शुक्लादिर्वा

कबते कबिश्चित्रकरो वा।

१४८. **क्लीबृ आधाष्ट्र्ये–**

अधृष्टस्य भावः अप्रागल्भ्यं–क्लीबते क्लीबः सङ्गरकर्मणि, न प्रगल्भते मल्लायेत्यर्थः।

१४९. **क्षीबृ मदे–**

मदो मत्तीभावः–क्षीबते सुरापः।

१५०. **शीभृ कत्थने–**

शीभते शोभां दूती कामुकस्य कामिनीसन्निधाने।

१५१-१५२. **ष्टभि स्कभि प्रतिबन्धे–**

स्तभ्मते स्तम्भश्छादनं, विष्कम्भते कवाटमङ्गना, स्थगयतीत्यर्थः।

१५३-१५४. **जभ जृभि गात्रविनामे।**

गात्रविनामोऽङ्गविस्तारः–जभते जृम्भते वा प्रातः कमलं, जम्भा।

१५५. **शन्भ कथने–**

शम्भते सुलभवार्तां नागरिकः।

१५६. **वल्भ भोजने–**

वल्भते भक्तं बुभुक्षितः।

१५७. **गल्भ धाष्टर्ये–**

प्रगल्भते वावदूकः सभायाम्।

१५८. **ष्टुभु स्तम्भे–**

स्तोभते वृषणं शीतो वायुः, जडीकरोतीत्यर्थः, अनुष्टुप्।

१५९-१६१. **घिणि घुणि घृणि ग्रहणे–**

घिणते घुणते घृणते घुणः काष्ठमाश्रयं, जरीघृण्यते।

१६२-१६३. **घुण घूर्ण भ्रमणे–**

घोणते घुणः, घूर्णते निद्राणः।

१६४. **स्रन्सु प्रमादे–**

स्रंसते धर्मपथादन्यमनाः, अनवहितो भवतीत्यर्थः, उखास्रत्।

१६५. **पण व्यवहारे स्तुतौ च–**
व्यवहारे शतस्य पणायते वणिक्, स्तुतौ राजानं पणायते कविः।

१६६. **पन च।**
चकारः स्तुतिमपेक्षते, न व्यवहारं पृथङ्निर्देशात्–पनायन्ते धार्मिकं प्रजाः।

१६७. **भाम क्रोधे–**
भामते सत्यभामा, बाभाम्यते बंभाम्यते इति कश्चित्।

१६८. **क्षमूष् सहने–**
क्षमते द्विजानामपराधं धार्मिकः।

१६९. **कमु कान्तौ।**
अयमिह सार्वधातुके न प्रयुज्यते आत्मनेपदिना अगणपठितेन चौरादिकेन धात्वन्तरेण कामयते काम्यते इत्यादि। असावर्धातुकविषये तु अचकमत अचीकमत कन्यां केलिपरः।

१७०-१७६. **अय वय पय मय तय चय रय गतौ–**
अयते ग्रामं पथिकः इत्यादि। परापूर्वायतेः पलायते। अन्येषां तु पेये मेये इत्येत्वम् अभ्यासलोपश्च।

१७७. **णय रक्षणे च–**
चकाराद् गतौ–नयते नदीम्।

१७८. **दय दानगतिहिंसादानेषु, चकाराद् रक्षणेऽपि–**
दयते धनं धार्मिको गुरवे, दादय्यते, दायकः, दयालुः।

१७९. **ऊयी तन्तुसन्ताने–**
ऊयते कन्थां सूचिकः, ऊयिष्ट।

१८०. **पूयी विशरणे दुर्गन्धे च–**
पूयते दुरितो मत्स्यः, पूतः।

१८१. **क्नूयी शब्दे–**
क्नूयते किङ्किणी, क्नोपयति। क्लेदेऽप्ययं कैश्चित्

पठ्यते–क्नूयते वस्त्रं आर्द्रं भवतीत्यर्थ:।

१८२. **क्ष्मायी विधूनने–**

क्ष्मायते क्षितिं क्षुब्धो नागराज:।

१८३-१८४. **स्फायी ओप्यायी वृद्धौ–**

स्फायते आप्यायते वा विधु:।

१८५. **तायृ सन्तानपालनयो:–**

सन्तानो विस्तारीकरणं-तायते पौरुषं दक्ष:।

१८६. **शल चलने सम्बरणे च–**

शलते शाल:, चलतीत्यर्थ:;।

शलते पुरं वृतिभि:, संवृणोतीत्यर्थ: शलक:, शलाका।

१८७-१८८. **वल वल्ल च–**

चकार: सम्बरणानुकर्षणार्थ:–वलते वल्लते वा वल्लरिं मधुपावलि:, वल्लि: वल्लभ:।

१८९-१९०. **मल मल्ल धारणे-**

मलते मल्लते वा मालां विषयी, मल: मल्ल:।

१९१-१९२. **भल भल्ल परिभाषणहिंसादानेषु–**

भलते भल्लते वा भल्लेन भटं परवीर:, हिनस्तीत्यर्थ:; भाल:, भल्ल:, भालुक:, भल्लक:, भल्लूक:।

१९३. **कल संख्याने–**

आकलते गोपालको गा:, कल:, काल:।

१९४. **कल्ल अशब्दे–**

कल्लते कम्बू:, न शब्दायत इत्यर्थ:। शब्देऽपि केचित्, कल्लोल:।

१९५-१९६. **तेवृ देवृ देवने–**

देवनमिह रोदनं–परितेवते परिदेवते बहु शोकाकुलो बाल:।

१९७-२०३. **शेवृ षेवृ केवृ खेवृ गेवृ ग्लेवृ (पेवृ भेवृ म्लेवृ इत्यधिकं रमानाथे) सेवने।**

सेवनमिहाराधनं उपभोगाश्रयणं च–सेवते शिष्यो गुरुम्।

केचिदिदं सोपदेशं मन्यमानाः सिसेव इत्यादि।

२०४. **रेवृ प्लवगतौ–**

रेवते वानरः शाखायाः शाखान्तरं, रेवा, रेवती, रेवतकः।

२०५. **क्लेश बाधने–**

क्लेशते मनस्विनं मथ्यमानः।

२०६. **स्पर्श स्नेहने–**

स्नेहनमार्द्रभावः–स्पर्शते पटः शिशिरेण।

२०७-२०८. **धुक्ष धिक्ष सन्दीपनजीवनक्लेशनेषु–**

धुक्षते धिक्षते वा वह्निराहुतिभिः।

२०९. **वृक्ष वरणे–**

वृक्षते वाटीं वृक्षैर्वास्तविकः।

२१०. **शिक्ष विद्योपादाने–**

शिक्षते मन्त्रं शिष्य उपाध्यायात्, शेशिक्ष्यते।

२११. **भिक्ष याञ्चायाम्–**

भिक्षते वदान्यं बुभुक्षुः।

२१२. **दक्ष वृद्धौ शीघ्रार्थे च–**

दक्षते दक्षिणायने रजनी, दक्षते लक्ष्मीं दक्षः,
शीघ्रमुत्पादयतीत्यर्थः। शीघ्रार्थ इति किं शीघ्रकरणं, दक्षिणा।

२१३. **दीक्ष मौण्डेज्यापनयननियमव्रतादेशेषु–**

दीक्षते वटुः, मुण्डितमुण्डो भवतीत्यर्थः।

२१४. **ईक्ष दर्शने–**

दर्शनं चक्षुःकरणकज्ञानमालोचनं च–ईक्षते रूपं कामिन्याः कामुकः।

२१५. **ईष गतिहिंसादानेषु–**

गत्यर्थे-ईषते ग्रामं, हिंसार्थे- दाने- पशुं,
ईषते-ईषते गुरवे धनं देवदत्तः।

२१६. **भाष व्यक्तायां वाचि–**

भाषते भवान् श्लोकम्।

२१७. **ग्लेषृ अन्विच्छायाम्–** ग्लेषते नष्टं धनमुद्योगी।

२१८. **येषृ प्रयत्ने–**
येषते यामिनीमतिवाहयितुं विरहिणी।

२१९-२२०. **जेषृ णेषृ एषृ ह्रेषृ गतौ–**
जेषते यशो दिगन्तम्।

२२१-२२४. **रेषृ हेषृ अव्यक्ते शब्दे–**
रेषते हेषते वा हयः।

२२५. **कासृ शब्दकुत्सायाम्–**
कासते काकः खरम्।

२२६-२२७. **कासृ भासृ दीप्तौ–**
कासते कमनीयाकृतिः। एवं भासते। कासांचक्रे पुरीं सौधैरित्यनेकार्थत्वाद् दीप्तौ पूर्वपठित एव।

२२८-२२९. **णासृ रासृ शब्दे–**
नासते रासते वा रासभः।

२३०. **णस कौटिल्ये–**
नसते तृणं, कुटिलं भवति करोति वेत्यर्थः, नासा।

२३१. **भ्यस भये–**
भ्यसते भल्लूकाद् ग्रामीणो जनः, अभ्यसिष्ट।

२३२. **आङः शसि इच्छायाम्–**
आङ्ग्रहणमेतत्पूर्वस्यैव प्रयोगो नान्यपूर्वस्य न केवलस्य इत्यवधारणार्थम्–
आशंसते पुत्रं पिता।

२३३-२३४. **ग्रसु ग्लसु अदने–**
ग्रसते ग्लसते वा पिण्डं भिक्षुः।

२३५. **ईह चेष्टायाम्–**
ईहते हालिकः कृषिकर्म, ऐजिहत्, ईजिहिषते।

२३६-२३७. **वहि महि वृद्धौ–**
वंहते मंहते वा वसन्ते मदो महिलायाः।

२३८-२३९. **अहि प्लिह गतौ–**
अंहते प्लेहते वा प्लीहा।

२४०-२४१. गर्ह गल्ह कुत्सने-
गर्हते गल्हते वा साधुमसद्वृत्तः।

२४२. वल्ह प्राधान्यपरिभाषणहिंसादानेषु-
वल्हते वाल्हीकेषु पुरुषमतल्लिका, प्रधानं भवतीत्यर्थः।

२४३. वर्ह च-
चकारोऽत्र परिभाषणादिमनुकर्षति न प्राधान्यं भिन्नवचननिर्देशात्। भिन्नवचनं स्पष्टार्थं मंन्यमानः चकारेण सर्वं पूर्वमनुकर्षति (कश्चित्)।
वर्हते वर्षासु वर्हा परिभाषत इत्यर्थः। हिंसादानयोरप्येवम्।

२४४-२४६. वेहृ जेहृ वाहृ प्रयत्ने-
वेहते जेहते वाहते वा अध्ययनेषु शिष्यः।

२४७. द्राहृ निद्राक्षये-
द्राहते यामिकः, त्रियामायां जागर्तीत्यर्थः।

२४८. ऊह वितर्के-
ऊहते परिणतमर्थम्। संपूर्वः समुच्चयनेऽपि-
समूहति-ते मानुषान् कृषकः।

२४९. गाहू विलोडने-
गाहते गहनं सिंहः,
अवविपूर्वः प्रायेण।

२५०. घुषि कान्तिकरणे-
घुंषते घुसृणलेपः कुचकलसं कामिनीनां, कान्तिं करोतीत्यर्थः।

२५१. ष्मिङ् ईषद्धसने-
स्मयते स्मरसुभगा विलासिनमवलोक्य। विपूर्व आसादिताश्चर्यभावे।

२५२-२५७. कुङ् खुङ् गुङ् घुङ् ङङ् उङ् शब्दे।
ङानुबन्ध आत्मनेपदार्थो भवन् अनुदात्तानुबन्धत्वं ज्ञापयति, तेन रुचाद्याश्रयोऽपि युरेषां न भवति-कवते खवते गवते घवते ङवते अवते वा अविः, कोकूयते, गुवाकः, ऊवे, उषिषते।

२५८-२६५. **च्युङ् छ्युङ् ज्युङ् झ्यूङ् प्रुङ् प्लुङ् गाङ् श्यैङ् गतौ–**
च्यवते छ्यवते ज्यवते झ्यवते प्रवते प्लवते गाते श्यायते वा सारसी सरः।

२६६. **रुङ् रोषणे च।**
रोषणे हिंसायां, चकाराद् गतौ च–
रवते रुरुवे रविः।

२६७. **धृङ् अवध्वंसने–**
अवध्वंसनं पतनं–धरते धारा वारिधरेभ्यः।
धारणेऽपि–धरते धारा वारिधरः। दिधीर्षते, देध्रीयते।

२६८. **मेङ् प्रतिदाने।** प्रतिदानं परीवर्तः,–
मयते माषान् मुद्गैः, अपमित्य याचते याचितुमपमयते।

२६९-२७०. **देङ् त्रेङ् पालने–**
दयते त्रायते वा दस्युभ्यो नृपतिः प्रजाः।

२७१. **प्यैङ् वृद्धौ–**
प्यायते पानीयं वर्षासु।

२७२. **पूङ् पवने।**
पवित्रभावः पवनमिह–पवते पवनः पन्थानम्।

२७३. **मूङ् बन्धने-**
मवते माणिक्यं कनकेन वणिक्।

२७४. **डीङ् विहायसा गतौ–**
उड्डयते विहगः, उड्डीनः कश्चित् प्रलपति, उड्डीत इति।

२७५. **गुप गोपनकुत्सनयोः–**
गोपनमपह्नवः, तत्राप्रत्ययान्तस्य त्यादावस्य प्रयोगो नास्ति, अनभिधानात्। कुत्सने तु जुगुप्सते गुणवान् विगुणम्।
निन्दया निवृत्तो वर्तमानस्यापादानविषयता पापात् जुगुप्सते।

२७६. **मान.पूजायाम्।**
पूजापूर्वकविचार इह पूजा

मीमांसते धर्ममुपपत्तिभि: नैयायिक:, अमीमांसि।

२७७. **वध बन्धने–**

अत्रापि निन्दायामेव सन् बन्धनार्थस्याप्रत्ययान्तस्य त्यादावस्याप्रयोग: पूर्ववत् बीभत्सते विवेकी विषयं, बन्धने वधक: वध इत्यादि।

२७८. **रभ राभस्ये**–राभस्यं प्रथमतो यत्न:–

अध्येतुमारभते शिष्य:।

२७९. **डुलभष् प्राप्तौ–**

लभते धनं, लब्भिरमम्।

२८०-२८२. **द्युत शुभ रुच दीप्तौ–**

द्योतते अद्युतत् अद्योतिष्ट देद्युत्यते। रुचि: प्रीणने वर्तते, तस्य कर्मणि संप्रदानसंज्ञा–रोचते रुचिरामना कामिनी, रोचते मधु यूने।

२८३. **श्विता वर्णे–**

वर्ण इह रूपविशेष:। धातुस्तु तद्भवने वर्तते– श्वेतते प्रासाद:, श्वित्रम्।

२८४. **ञिमिदा स्नेहने–**

मेदते तन्व्यास्तनुर्भाविन, मेदुर:।

२८५. **ञिष्विदा मोचने च–**

चकारात् स्नेहने। मोचने-स्वेदते सर्षपस्तैलं मुञ्चतीत्यर्थ: स्नेहने-

स्वेदते सूपकारस्याङ्गं महानसे पचत:।

२८६. **घुट परिवर्तने–**

परिवर्तनमिह गतप्रत्यागमनं विनिमयो वा–व्याघोटते घोटक: संग्रामभूमौ, घुटिका।

२८७-२८९. **रुट लुट लुठ प्रतीघाते–**

प्रतीघात इह शोकादिना पतनं प्रतिनिवर्हणं वा–रोटते लोटते लोठते वा भूमौ कातर:, लुट्यतीति दैवादिकेन, रोटति लोठतीति परस्मैपदिनो:।

२९०. **क्षुभ संचलने–**
क्षोभते मनः कातराणां रणे।

२९१-२९२. **णभ तुभ हिंसायाम्–**
प्रणभते नभसि पक्षिणं व्याधः, तोभते वा, नभः, नाभिः।

२९३-२८४. **स्रन्सु भ्रन्सु अवस्त्रंसने–**
अवस्रंसममधःपातः–स्रंसते भ्रंसते वा तालफलं वृक्षाग्रात्, उखास्रत्।

२९५. **ध्वन्सु गतौ च–**
चकारः पूर्वार्थकर्षणार्थः–ध्वंसते वातेन पत्रं वृक्षात्, पर्णध्वत्।

२९६. **स्रन्भु विश्वासे–**
अशङ्कितभावो विश्वासः–विस्रम्भते नृपतिरमात्ये।

२९७. **वृतु वर्तने–**
वर्तते रविराकल्पम्।

२९८. **वृधु वृद्धौ–**
वर्धते विधुः।

२९९. **शृधु शब्दकुत्सायाम्–**
शर्धते माषाशी, पर्दत इत्यर्थः।

३००. **स्यन्दू स्रवणे–**
स्यन्दते तैलं कुदृतेः।

३०१. **कृपू सामर्थ्ये–**
समर्थभवनमिह सामर्थ्यं–कल्पतेऽल्पोऽपि ससहायः साधयितुमर्थान्, चा (चली?) क्लिप्यते।। वृत्।।
वृदिति द्युतादिवृतादिसमाप्त्यर्थम्। तत्र द्युतादयो द्वाविंशतिः
वृतादयः पञ्च अद्यतन्यां द्युतादीनां वृतादेः स्यसनोस्तथा।
यजाद्याकृतिगणत्वात् श्वस्तन्यामुभयं कृपेः।।

१. **घट चेष्टायाम्–**
घटते पटुः कपटकरणे, घटा।

२. **व्यथ दुःखभयचलनयोः–**
व्यथते पृथुशोथोऽपथ्यशालिनं दुःखाकरोतीत्यर्थः,

व्यथते वृकेभ्यो भीरुः भयेन पलायत इत्यर्थः, व्यथकः।

३. **प्रथ प्रख्याने–**

प्रथते पृथिव्यां पृथुयशः श्रीरामस्य, प्रथा, प्रथकः।

४. **प्रस विस्तारे–**

प्रसते शिशुभाषा मनोमुदम्।

५. **म्रद मर्दने–**

म्रदते दम्यः खले व्रीहीन्।

६. **स्खद स्खदने–**

स्खदनमिह हिंसा–स्खदते क्षुद्रः क्षमाशीलं, स्खदा।

७. **क्षजि दाने गतौ च–**

क्षञ्जते खञ्जनः शुभफलं दृष्टः, अक्षञ्जि अक्षाञ्जि।
घटादिपाठादनुपधाया अपि दीर्घत्वं, क्षञ्जा।

८. **दक्ष हिंसायां च–**

चकाराद् गतौ–दक्षते लक्ष्यकृतं कुरङ्गं व्याधः।

९. **क्रप कृपायाम्–**

कृपेह दयाभावना–क्रपते कृपालुहृदयो दीनाननाथान्, कृपा।

१०–११. **कदि क्रदि वैक्लव्ये–**

वैक्लव्यमिह विक्लवीभवनं–कन्दते क्रन्दते वा कुमारी शोकेन।

१२–१३. **कद क्रद आह्वाने रोदने च–**

कन्दते क्रन्दते वा दूरादरातिं वीरः, कदा, क्रदा। केचिदमू एकयोगं कृत्वा वैक्लव्ये पठन्ति, नाह्वाने रोदने च।

१४. **ञित्वरा संभ्रमे–**

संभ्रम इह शीघ्रमनुष्ठानं–त्वरते चतुरः कृतानि।।
घटादयः षानुबन्धाः। चतुर्दश धातव इह घटादयो लाघवार्थं षानुबन्धत्वेन अङर्थमभ्युपेताः।। आत्मनेभाषाः (३१५)

१५. **ज्वर रोगे–** ज्वरति जनोऽजीर्णवान्।

१६. **गड सेचने–** सेचनमिह क्षरणं–गडति गलति वा तैलं पात्रात्।

१७. **हेड वेष्टने–**

हेडति हेमकाञ्च्या काचिज्जघनं, अहिडि, अहेडि, केचित् अहीडि।

१८-१९. **वट भट परिभाषणे–**

वटति भटति वा भटो रणाटव्यां, वटयति भटयति,
वट वेष्टने भट भृतौ इत्येताभ्यां वाटयति भाटयति।

२०. **नट नृतौ–**

नृतौ इति क्तौ तलोपोऽस्मादेव ज्ञापकात्।
अस्योभयत्र पाठः उभयरूपप्रतिपत्त्यर्थमेव, नटयति नाटयति;
केचित् नृतावित्यस्य स्थाने गताविति पठन्ति।

२१. **ष्टक प्रतीघाते–**

स्तकति शस्त्रेण परं वीरः।

२२. **चक तृप्तौ च–**

चकारात् प्रतिघाते–चकति चक्रेण चक्रपाणिः रिपुचक्रं, चकति सुचरितेन सुतस्य पिता, तृप्यतीत्यर्थः।

२३. **कखे हसने–**

कखति खेलायाम्।

२४. **रगे शङ्कायाम्–**

रगति रोगी कुपथ्येभ्यः।

२५. **लगे सङ्गे च–**

चकारात् शङ्कायां–लगति रागः शुक्लवाससि।

२६-२९. **ह्रगे ह्लगे षगे स्थगे संवरणे–**

ह्रगति ह्लगति सगति स्थगति स्थूलो मेघः सलिलमाकाशे।
कश्चित् ष्ठगे इति पाठं मन्यते।

३०. **कगे नोच्यते।**

अस्यायमर्थो नोच्यते अनिर्दिष्टार्थोऽयं क्रियासामान्यवाची मानुबन्ध इत्यर्थः। कगेधातुरिह न पठ्यते भाषायामप्रयोगादिति, कश्चित् कगति काकः गच्छतीत्यर्थः।

३१-३२. **अक अग कुटिलायां गतौ–**

अकति अगति वा नगेषूरगः, आगः, अग्निः।

३३-३४. **कण रण गतौ–**

शब्दार्थयोः पुनरिह पाठो गतावेव ह्रस्वार्थः–कणयति रणयति वा निजावासं वसन्तः पथिकान्।

३५-३७. **चण शण व्रण दाने–**

चणति शणति व्रणति वा प्रियमर्थिने सत्पुरुषः, चणकः, शणः, शाणः।

३८-४०. **श्रथ क्रथ क्लथ हिंसार्थाः–**

श्रथति क्रथति क्लथति वा पार्थिवः साहसिकस्य।

४१. **चन च–**

हिंसानुकर्षणार्थश्चकारः–चनति चौरं नृपतिः।

४२. **वनु च नोच्यते।**

कगेवत् सामान्यक्रियावाची–वनति वनं वृकयूथः।

४३. **ज्वल दीप्तौ–**

ज्वलति युवतिहृदये कामानलो दयितविरहे, ज्वलः, ज्वालः।

४४-४५. **ह्वल ह्मल चलने–**

ह्वलति ह्मलति वा गह्वरे सिंहः।

४६. **स्मृ आध्याने–**

आध्यानं स्मरणं, तदेवायं मानुबन्धः– स्मरयति स्मरः कामिनीं कामुकस्य, अन्यत्र विस्मारयति सुहृदमविनीतं सम्पदागन्तुका।

४७. **दृ भये–**

दृ विदारण इति क्रैयादिकस्य इह पाठो मानुबन्धार्थः, न पुनः प्रकृत्यन्तरमनभिधानात्–दरयति दारुणो नृपतिः प्रजाः, भयादन्यत्र दारयति दारुं वर्धकिना गृहस्थः।

४८. **नृ नये–**

अयमपि क्रयादिपठितो मानुबन्धार्थ इह पाठः नृणन्तं प्रयुंक्ते–नरयति नरपतिममात्यः।

४९. **श्रा पाके–**
श्रातिश्रायत्योरदादिभ्वादिपठितयो: पुनरिह पाठो घटादित्वार्थ:–श्रपयति यवागूं सूपकारेण गृही। पाकादन्यत्र श्रापयति ग्रामं भृत्यं स्वामी। अनेकार्थत्वादयमिह गतौ वर्तते।

५०. **मारणतोषणनिशामनेषु ज्ञा–**
एष्वर्थेषु जानाति र्मानुबन्ध इत्यर्थ:–ज्ञपयति समितौ सामन्तं परवीरो मारयतीत्यर्थ:,
ज्ञपयति राजानं कवि: सूक्तेन तोषयतीत्यर्थ:,
ज्ञपयति रूपं कामिनी कामुकान् दर्शयतीत्यर्थ:,
निशामनमालोचनं चक्षुर्जन्यज्ञानं ज्ञप मानुबन्धश्चेति चुरादौ स्वार्थे नन्तं पठिष्यति। मानुबन्धश्चेति वचनं पुनर्मारणाद्यतिरिक्तज्ञानमात्रेऽपि ह्रस्वार्थम्।

५१. **कम्पने चलि:–**
चलयति शाखां वात:, कम्पनादन्यत्र चालयति सूत्रं, विचारयती त्यर्थ:। यद्यपि चल कम्पने उक्तस्तथापि धातो-रनेकार्थत्वादिदमुपपद्यते।

५२. **ऊर्जने छदि:–**
छद संवरणे चुरादौ तस्य ऊर्जने बले प्राणने च मानुबन्धत्वं–छदयति वत्सं पय:, बलिनं जीवितं वा करोतीत्यर्थ:, अन्यत्र छादयति गृहं गृही।

५३. **जिह्वोन्मन्थने ललि:–**
लल विलासे जिह्वोन्मन्थने मानुबन्ध:-ललयति जिह्वां व्याल:, अन्यत्र लालयति बालं पिता। जिह्वोन्मन्थनयोरिति पाठं मन्यमानेन ललयति शत्रुं विलोडयति तदा हननं मन्यते, जिह्वेति जिह्वाविषया क्रियोच्यते।

५४. **हर्षग्लेपनयोर्मदि:।**
मदी हर्षे दैवादिक: एतयोरर्थयोर्मानुबन्ध:–
मदयति मित्रं सुजनो दुर्जनो वा। आभ्यामन्यत्र प्रमादयति

दुर्दैवं विद्वांसमपि।

५५. **ध्वन शब्दे।**

शब्द एव पठितोऽयं पुनर्मानुबन्धार्थं तत्रैव पठ्यमानो नात्र वृत्तिं साधयति–ध्वनयति साधुः कोकिलं, अन्यत्र ध्वानयति वल्लरीं वातः कम्पयतीत्यर्थः।

घटादयो मानुबन्धाः।

५६-६०. **जनी जृष् क्नसु रन्जोऽमन्ताश्च।**

जनीति निर्देशः परमतानुवादार्थ एव–जनयति जन्यं भगवान्, जरयति जनमयोग्यचिन्ताभावः, क्रसयति कान्त्या भवनोदरं कलानिधिः। रन्जेर्मृगरमण एव–रजयति मृगानाखेटिकः, रमयति रमणीयता रामां, भ्रमयति चक्रं चक्रपाणिः।

६१-६४. **ज्वल ह्वल ह्मल नमोऽनुपसर्गा वा–**

ज्वलयति ज्वालयति वा जातवेदसं यायजूकः, ह्वलयति ह्वालयति ह्मलयति ह्मालयति वनितां वातः, नमयति नामयति वा पल्लवं वायुः। सोपसर्गत्वे नित्यं मित्त्वं घटादित्वात् प्रज्वलयतीत्यादि।

६५-६८. **ग्ला स्ना वनु वमश्च–**

एते अनुपसर्गाः सन्तो मानुबन्धा वेत्यर्थः–
ग्लपयति ग्लापयति वा आतुरं चिराय रोगः,
स्नपयति स्नापयति वा बालां माता,
वनयति वानयति वा धनं भृत्यं स्वामी गमयतीत्यर्थः,
वमयति वामयति वाजीर्णमौषधेन भिषक्। सोपसर्गत्वे न मित्त्वम् प्रग्लापयति प्रस्नापयति उद्वनयति उद्वोमयति।

६९-७१. **न कम्यमिचमः–**

अमन्तत्वात् प्राप्ते प्रतिषेधः–
कामयति तपस्विनमप्सरोभिरिन्द्रः,
आमयति आतुरं रोगेण दुर्दैवम्, आचामयति पानीयं गां गोरक्षकः।

७२. **शमोऽदर्शने–** शमयति रोगं पथ्याशिता। अदर्शन

इत्येव–निशामयति रूपं कामिनी, यून: दर्शयतीत्यर्थ:। केचित् नञवृत्तिमिच्छन्तो विपरीतमुदाहरन्ति।

७३. **यमोऽपरिवेशने (षणे, रमा)–**

परिवेशनं अन्नादेरुपसमर्पणं–नियमयति राजा दुर्वृत्तान्, परिवेशने तु–यामयति श्राद्धे ब्राह्मणेभ्योऽन्नादिकं पत्न्या दानपति:। नञ्वृत्तौ विपरीतमुदाहरणम्।

७४. **स्खदिरवपरिभ्यां च–**

स्खदयति अवस्खदयति परिस्खदयति पक्षे वादी स्थिरयतीत्यर्थ:। नियम: किं–प्रस्खादयति, नञ्वृत्तौ विपरीतमुदाहरणम्।

७५. **फण गतौ–**

अस्मिन्नर्थेऽयं धातुर्मानुबन्धश्च–फणति फणी विवरं, फणयति तं विषवैद्य:। गतेरन्यत्र फाणयति फाण्टम् अनायासेन जनयतीत्यर्थ:।

वृत।। वृत्करणं घटादयो मानुबन्धा इति परिच्छेदार्थम् एते पञ्चविंशति: परस्मैभाषा:।। ज्वरप्रभृतय: फणपर्यन्ता: परस्मैपदिन इत्यर्थ:।

७६. **राजृ दीप्तौ–**

राजति-ते राजानमुपनाथन् उभयतोभाव:। अयमुभयपदीत्यर्थ:।

७७-७९. **टुभ्राज टुभ्राश (शृ, रमा) टुभ्नाश दीप्तौ–**

भ्राशते भ्नाशते भं नभसि। भ्राशभ्नाशो: पक्षे यन् – आत्मनेभाषा:। एते त्रय आत्मनेपदिन इत्यर्थ:। केचिदमीषां ऋदनुबन्धत्वमादृतवन्त:, तदिहासम्मतम्। भ्राजादीनां प्रतिपदमेव ह्रस्वाविकल्पविधानात् अवभ्राजत् अविभ्राजत् अवभ्राशत् अविभ्राशत्। भ्नाशेस्तु अवभ्नाशादित्येव। भ्राजथुरित्यादि ट्वनुबन्धत्वात्।

८०-८२. **स्यमु स्वन ध्वन शब्दे–**

स्यमति स्वनति ध्वनति वा शङ्ख: संग्रामे, स्येमतु: सस्यमतु:। दण्डकपठितस्य ध्वनेरिह पाठोत्यकिञ्चित्कर इत्यस्माकम्।

केचिद् ध्वनितं तम इत्यपीच्छन्तो व्याचक्षते स्वनिसह-चरितस्यैव ध्वनेरिडभावो नान्यस्येति। एतत् तु वाजिविषाण-धनुषा महार्घतासाधनसाधीयो धीमतां मतिरतिदूरमेव नावमन्यते।

८३-८४. **षम ष्टम वैक्लव्ये–**

समति स्तमति वा शोकेन कातरः।

८५. **ज्वल दीप्तौ–**

ज्वलति वह्निस्तृणपुञ्जे, ज्वालः, ज्वलः।

८६. **चल कम्पने–**

चलत्यम्बरं वातेन, चालः, चलः।

८७. **जल धान्ये–**

धीयते जीवोऽनेनेति धानं, तस्य भावः जीवनोपयोगिक्रियोच्यते–जलति जनान् जीवयतीत्यर्थः। धीयते आच्छाद्यतेऽनेन तस्य भाव आच्छादनक्रिया–जलति जालेन मत्स्यान् जालिकः घान्य इति केचित् घनीभवने, जडं, जलं, जालम्।

८८-८९. **टल ट्वल वैक्लव्ये–**

टलति ट्वलति वा कालेन त्रिभुवनम्।

९०. **ष्ठल स्थाने–**

स्थलति जलापगमे जलप्लुतं पुलिनं, स्थलं-ली, स्थालम्।

९१. **हल विलेखने–**

हलति खिलं सीरेण कृषकः, हलं हला हालाहलम्।

९२. **णल गन्धे–**

नलति नलिनं नलिन्याः सुगन्धीभवतीत्यर्थः, नडः-लः, नाला-लं, परिणलति।

९३. **वल प्राणने-**

वलति प्राणेन धान्यं जीवतीत्यर्थः।

९४. **पुल महत्त्वे–**

पोलति पुलिनं शरत्काले महद्भवतीत्यर्थः।

९५. **कुल संख्याने बन्धुषु च–**
कोलति कुलालः कुम्भान्, गणयतीत्यर्थः, कोलति कुलीनः, सर्वेषां बन्धुर्भवतीत्यर्थः बन्धुषु ज्ञातिषु वर्तमानोऽन्यत्राप्रयोगो गण्डवदिति केचित्, कुलं कोलः।

९६. **हुल हिंसासंवरणयोः–**
होलति पादतले कोमलाङ्गीं धान्यशूकः, हुलं, होलः। होलति कलानिधिं मेघः, संवृणीते इत्यर्थः। तुल इति केचित्, तु इति चापरे।

९७-१००. **पल शल पत्लृ पथे च गतौ।**
हुलिरपि गतौ चकारात्–पलति शलति पतति पथति पत्रं वृक्षात्, पलं पन्थाः।

१०१. **क्वये निष्पाके–**
क्वयति भिषगौषधफलकं निष्पचतीत्यर्थः, क्वथः क्वाथः।

१०२. **मथे विलोडने–**
मथति दधिकुम्भमाभीरनारी, मथः माथः।

१०३. **टुवम उद्‌गिरणे–**
वमति वातकी भुक्तमन्नम्। केचिदमुमुदनुबन्धं पठन्ति। तन्मते इडभावः, अस्माकं तु वमित इत्येव, अनिट्प्रयोगस्तु यथाकथञ्चित् आगमस्यानित्यत्वात्, वामकः, वमः, वामः।

१०४. **भ्रमु चलने–**
भ्रमति भ्रम्यति वा भ्रमरः, मिथ्याज्ञानेऽपि भ्रम्यति रजन्या सुप्तिकया। अशमादित्वात् न दीर्घः, अतएव विकल्पितो यन्, अन्यथोभयपाठादेव उभयरूपसिद्धेः। बभ्रमतुः केचिदमुष्य एत्वमभ्यासलोपो नेति मन्यन्ते भ्रमतुरित्यादि, तथा च भ्रमुववल्गुरित्यादि, भ्रमः भ्रान्तिः।

१०५. **क्षर संचलने–**
क्षरति लक्ष्यादलक्षितस्य शरः। **परस्मैभाषाः।**

१०६. **षह मर्षणे–**
सहः साहः। विकल्पे नन्तेषु परस्मैपदिषु पाठात् सहतीत्यपि

क्वचित्, तथा च प्रयोगः–सहति कलभेभ्यः परिभवम्।

१०७. **रमु क्रीडायाम्–**

रमते बाली रेवत्या। आत्मनेभाषौ।

१०८. **षद्लृ विशरणगत्यवसादनेषु–**

विशरणं हिंसा गतिर्देशान्तरप्राप्तिः, अवसादनमाकुलीभावः स्थितौ अव (प्र?) सन्नीभावे च–प्रसीदति वासुदेवो भक्तप्रीत्या।

१०९. **शद्लृ शातने–**

शातनमिह पातनं–शीयते पत्रं पवनो वृक्षात्, शीयते पत्रं वृक्षादित्यपि पतनं पातनं चास्य स्वार्थः। शशाद अशीशतत् शदुः शदः शादः।

११०. **क्रुश आह्वाने–**

क्रोशति रुषा कषायितो हि शत्रुः, क्रुशः क्रोशः।

१११. **कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु–**

संकोचति कमलं रविरश्मिविगमे, प्रतिष्टब्धं भवतीत्यर्थः। अस्मिन्नेव प्रायो वृत्तिरुदाहरणं च।

११२. **बुध अवगमने–**

बोधति बुद्धिमान् सकलशास्त्रम्।

११३. **रुह जन्मनि प्रादुर्भावे–**

रोहति केदारे यवाङ्कुरः। आङ्पूर्वोऽसौ आक्रमणे वर्तते, अवपूर्वोऽधःपतने।

११४. **कश गतौ–**

कशति काश्मीरं वणिक्। निमूलसमूलयोः कशः, निमूलकाशं कशति, सर्वकुलाभ्रकरीषेषु कशः इति सर्वंकश इत्यादि। वृत्। ज्वलादिसमाप्त्यर्थौ। वृत्करणं ते पुनस्त्रिंशत्।

१. **हिक्क अव्यक्ते शब्दे–**

हिक्कति-ते कलभः, अव्यक्तं ध्वनति तरुणहस्तीत्यर्थः।

२. **धावु गतिशुद्धोः–**

धावति-ते वीरो रणे रणोत्सुकः। सामान्यपठितस्यापि

विशेषवृत्तिरभिधानात्–धावति वासो धौतकारः शोधयतीत्यर्थः, धावति ताम्रमम्लेन शुध्यतीत्यर्थः।

३-४. **अञ्चु व्ययगतौ–**
अञ्चति-ते व्ययति-ते वाराणसीं तीर्थिकः। केचिदिह अचु गताविति पठन्ति–अचति-ते।

५. **अस दीप्त्यादानयोश्च, चकाराद् गतौ–**
असति-ते खद्योतस्तमिस्रायाम्। धातुनामनेकार्थत्वात् सत्तायामपि, तथा च–लावण्यमुत्पाद्य इवास यत्न इति।

६. **वेणृ ज्ञानचिन्तानिशामनेषु च,** चकारात् प्रकृतायां गतौ–
वेणति-ते वैणविको वेणुं, वादयितुं जानातीत्यर्थः, वेणी।

७. **टुयाचृ याच्ञायाम्–**
याच्ञा दातुं प्रेरणा–याचति-ते चमूरुनयनां रतिं मानदः। ग्रहीतुं प्रेरणायामपि–याचति वित्तं गुरवे शिष्यः। याचयुः। ड्वनुबन्ध इति केचित्, याचित्रिम्।

८. **रेटृ परिभाषे–**
रेटति-ते वटुर्वयस्येन, मिथ आलापयतीत्यर्थः।

९-१०. **चते चदे याचने च–**
चकारात् परिभाषणे–चतति-ते चदति-ते वा विद्यां गुरुमभियुक्तः, चतुरः चत्वारः चातकः।

११. **प्रोथृ पर्याप्तौ–**
प्रोथति-ते प्रोथं वराहस्य भद्रमुस्तमुत्पाटयितुम्।

१२-१३. **मिदृ मेदृ मेधाहिंसयोः–**
मेदति-ते दीनमसाधुः हिनस्तीत्यर्थः।
मेधायां-मेदति शास्त्रार्थं मेधावी, धारयतीत्यर्थः।

१४. **मेधृ सङ्गमे च।**
चकारात् पूर्वयोः–मेधति-ते मित्रं मित्रेण, संगच्छत इत्यर्थः, मेधा मेधिः।

१५-१६. **णिदृ णेदृ कुत्सासन्निकर्षयोः–**
नेदति-ते दयालुः कापटिकम्।

१७-१८. शृधु मृधु उन्दे–

शर्धति-ते, मर्धति-ते वा मूर्धा तैलेन क्लिद्यतीत्यर्थः, शृधुः मृधुः मृधः मृधा।

१९. बुधिर् बाधने–

बाधति-ते बुधः। बुध अवगमने इति पूर्वपठितस्य प्रयोजनं मतान्तरे कर्त्रभिप्राये परस्मैपदम्।

केचित् पुनर्गत्यर्थस्य अबुधत इत्यादिप्रयोगनिरासार्थम्।

२०. उबुन्दिर् निशामने।

निशामनमालोचनं प्रणिधानमिति यावत्–बुन्दति-ते वास्तविको ग्रामकार्यं, बुद्धः।

२१. खनु अवदारणे–

खनति-ते खातं कौद्दालिकः, चख्ने खायकः, शिल्पी चेत् खनकः।

२२-२३. झष चीवृ आदानसंवरणयोः–

झषति-ते जालिकः झषान् आदत्त संवृणुत इत्यर्थः,

चावति-ते वल्कलं वानप्रस्थः गृह्णाति परिदधाति वेत्यर्थः।

२४. चायृ पूजानिशामनयोः–

चायति-ते प्रतिमा माङ्गलिकः पूजयति निशामयति वेत्यर्थः।

२५-२६. दासृ दाश्टृ दाने–

दासति-ते दाशति-ते वा समुद्रं दानपतिः, दाशो दानपात्रम्।

२७. भेष भये–

भेषति-ते वृकेभ्यो भीरुः।

२८. भ्रेषृ चलने–

भ्रेषति-ते विरुद्धवादी न्याय्यपथात्।

२९. पष बाधनस्पर्शनयोः–

पषति-ते पीडा आतुरम्। स्पष इत्येके, तालव्योऽयमित्यपरे।

३०. लष कान्तौ–

अभिलषति-ते विलासी कामिनीं, पक्षे यन्।

३१-३२. **चष भक्ष भक्षणे–**
चषति-ते भक्षति-ते बुभुक्षुरोदनम्। भ्लक्ष इत्यपरे।

३३. **कष हिंसायाम्–**
कषति-ते दिवसे उलूकं काक:; विकाषी, विकष्वर:, तत्र कश गतावित्यपरे।

३४. **माहृ माने–**
माहति-ते महीतले न यशो यशोधनस्य। उदनुबन्ध इत्यपरे।

३५. **गुहू संवरणे–**
निगूहति-ते परदोषं गुणवान्।

३६. **हृञ् हरणे–**
हरणं देशान्तरप्रापणं–हरति-ते भारं ग्रामं भृत्य:।
अपनयनमात्रेऽपि–हरति चौरो धनम्। पादहारक इति कर्मणि नूपुर उच्यते, कवचहर:, दृतिहरि:, नाथहरि:।

३७. **भृञ् भरणे–**
भरणमिह पोषणं पूरणं वा–भरति-ते भृत्यं स्वामी, भरति कुम्भं भृत्यो वारिणि।

३८. **अलञ् भूषणपर्याप्तिवारणेषु–**
अलति-ते बालामभिसर्तुं सखी, भूषयति निवारयति वेत्यर्थ:।
पर्याप्तावकर्मकोऽयं–अलति बाला वल्लभमभिसर्तुम्।

३९. **धृञ् धारणे–**
धरति-ते धरां धराधर:, पतितं न ददातीत्यर्थ:।

४०. **णीञ् प्रापणे–**
नयति-ते नायक: परबलमनुक्षणं क्षयम्।
प्रपूर्वोऽयं करणे–प्रणयते शास्त्रं मुनि:,
विपूर्वोऽयं शिक्षायां–विनयते शिष्यं गुरु:,
उपपूर्वोऽयं वेदधारणायां–उपनयते पुत्रं पिता,
अपपूर्वोऽयं खण्डने–अपनयते क्रोधं साधु:।

४१. **दान अवखण्डने–**
अवदीदांसति-ते परपक्षं वादी।

केचिदार्जवे सनमिच्छन्ति–दीदांसति दारु वर्धकिः, ऋजुकरोतीत्यर्थः, दीदांसयति, दीदांसिषति।

४२. **शान तेजने–**

शीशांसति–ते खड्गं कर्मकारः। अवदानयति निशानयतीति कश्चित्,अस्माकं तु दो अवखण्डने शो तनूकरण इत्येताभ्यां युडन्ताभ्यां साधनीयम्।

४३. **डुपचष् पाके–**

पाक इह विक्लित्यनुकूलो व्यापारः–पचति–ते तण्डुलान् शूपकारः, पाक्यः, पचेलिमः, पचः, पक्त्रिमः, पचा।

४४-४५. **भज श्रिङ् सेवायाम्–**

भजति–ते कृष्णं योगी, श्रयति–ते वा।

४६. **रन्ज रागे–**

राग इह वर्णान्तरापादनं आसक्तिर्वा–रजति–ते वस्त्रं कुसुम्भेन रजकः, रंजति रमायां रमणः आसजतीत्यर्थः, रजनी रज्जुः।

४७. **शप आक्रोशे–**

आक्रोशो गालिदानं–शपति–ते शिशुमसहनः। शपथे शप इत्यात्मनेपदं–शपते आत्मानं देवदत्ताय कुमारी।

४८. **त्विष दीप्तौ–**

त्वेषति–ते वा तपनस्तपागमे। दाननिरसनयोरप्ययमित्येके।

४९. **यज देवपूजासङ्गतीकरणदानेषु–**

यजति–ते देवान्, यजति सज्जनं साधुः मित्रीकरोतीत्यर्थः– यजते पशुना रुद्रं, रुद्राय पशुं ददातीत्यर्थः।

५०. **डुवप् वीजतन्तुसन्ताने–**

वपति–ते वीजं क्षेत्रे कृषकः,
वपति वस्त्रं तन्तुवायः, उप्त्रिमः, वप्रः।

५१. **वह प्रापणे–**

वहति–ते गाणां ग्रामं गौः, वह्यं, शकटम्।

५२. **वेञ् तन्तुसन्ताने–**

वयति–ते तन्तुं तन्तुवायः, विवासति, वावायते।

५३. **व्येञ् संवरणे–**
संव्ययति-ते वसनेन जघनं युवतिः, समव्यासीत्।

५४. **ह्वेञ् स्पर्धायां शब्दे च–**
स्पर्धा अन्योन्यमभिभवः परिभवेच्छा वा–आह्वयति-ते मल्लो मल्लं परस्परं अभिभवतीत्यर्थः, आह्वयति दूरादाखेटिकः, आकारयतीत्यर्थः, जुहूषत, जाहूयत। उभयतोभाषाः।
हिक्कादया ह्वेञ्पर्यन्ता उभयपदिन इत्यर्थः; ह्वेञ्प्रभृतयः समाहारानुबन्धा न स्वीक्रियन्ते मुनिभिः तदनुरोधादेव भाषायां ञकारकरणं प्रपञ्चितमाचार्यपादैरित्याधेयम्।

५५. **वह व्यक्तायां वाचि–**
वहति विद्वान् सूनृतं मित्राणि।

५६. **वस निवासे–**
वसति साधुः सज्जनसमाजे, वास्तव्यः। केचिदमुं वदेः पूर्वं पठन्ति।

५७. **टुओश्वि गतिबृद्ध्योः**–श्वयति श्वापिण्डमत्तं, श्वयति शशी
१. वद्=वदति शुक्लपक्षे अनुदिनं, शुशावयिषति, शिश्वाययिषति, श्वा।
वृत्। वृदिति गणसमाप्त्यर्थं परस्मैभाषाः।
वदवसश्वयः परस्मैपदिन इत्यर्थः।

इति दुर्गसिंहोक्तगणवृत्तौ उत्सर्गिकान्विकरणा भ्वादयः समाप्ताः।

अदादिगणः

१-२. **अद प्सा भक्षणे–**
अत्ति गुडं पोतः, प्साति तृणं गौः, पिप्सासति, पाप्सायते।

३. **षस स्वप्ने–**
सस्ति स्वस्तिमान् सुखेन स्वपितीत्यर्थः।

३क. **वश कान्तौ–**
वष्टि कष्टं न कश्चित्।

४. **हन हिंसागत्योः–**
हन्ति परभटान् आहवे वीरः; गतावस्याप्रायिकः प्रयोगः।

५. **धु अभिगमने–**
द्यौति द्यूतकारान् सभिकः, द्युवन्।

६. **यु मिश्रणे–**
यौति यवागूं पयसा पिपासुः।
केचिदमुमकर्मकमेव मन्यते, तदा यौति यवागूः पयसा पिपासुः।

७. **णु स्तुतौ–**
नौति नायकं सत्कविः स्तुतिभिः।

८. **क्षणु तेजने–**
क्षणौति खड्गं कर्मकारः निशानयतीत्यर्थः।

९. **ष्णु प्रस्रवणे–**
प्रस्नौति गौर्वत्ससन्दर्शनेन।

१०-१२. **टुक्षु कु रु शब्दे–**
क्षौति कौति रौति वा कोकिलः। सामान्यनिर्देशेऽपि कौतिः शब्दमात्रे कुवतिरार्तस्वरे कवतिरव्यक्तस्वरेऽभिधानात्।

१३. **षु प्रसवे–**
सौति शवली धवलवत्सम्।

१४. **इक् स्मरणे।**
अधिपूर्वस्यैवास्य प्रयोगोऽभिधानात् तथा इङ्इकावधिपूर्वाविवेति दुर्गसिंहः–अध्येति वधूरधिनाथस्य। ससीतयोः राघवयोरधीयन्निति भट्टिप्रयोगस्तु अनेकार्थत्वादिङा समर्थनीयः। केचित् तु इक् स्मरण इत्यस्यैव अधीयन्निति इयादेशः यादेशः पुनर्न भवति इण्वदिकोऽपीति अपिशब्दस्य बहुलार्थत्वादित्याहुः। वस्तुतस्तु इण् गतिस्मृत्योरिति पाठे सिद्धे पृथगिकः पाठोऽनित्यार्थमादेशस्य।

१५. **इण् गतौ–**
एति नीतिमन्तं नृपलक्ष्मीः।

१६. **वी प्रजनकान्त्यसनखादनेषु–**
प्रजनो गर्भग्रहणं कान्तिरिच्छा असनमिह क्षपणं (व्याप्ति वा, तदा तालव्यमध्यः) खादनमभ्यवहारः, चकाराद् गतिश्च, एतेषु यथाभिधानं प्रयोगः प्रत्येतव्यः–वेति गौः।

१६क. **भा दीप्तौ**–दीप्तिरिह उज्ज्वलभावः-भाति भास्कर उदयगिरिमारूढः। प्रतिपूर्वस्य भायोगे षष्ठ्यर्थे द्वितीया प्रतिभाति भवन्तमयमर्थः।

१७. **या प्रापणे।**
प्रापणमिह प्राप्तिरेव गत्यर्थान्तरं न पुनः प्रापणा–याति देवो यमुनां विहर्तुम्।

१८. **वा गतिगन्धनयोः–**
गतिरिहानुदृश्या अतो व्यापिका गन्धनं सूचनं–वाति वायुश्चलतीत्यर्थः, वाति वृष्टिवातां पिपिलिकापंक्तिः, सूचयतीत्यर्थः।

१९. **ष्णा शौचे–**
स्नाति तीर्थतोये तपस्वी।

२०. **श्रा पाके–** श्राति यवागूं दरिद्रगृहिणी।

२०क. **द्रा कुत्सायां गतौ–**
कुत्सायामिति गतिविशेषणं–द्राति पङ्गुः, निपूर्वो निद्रायाम्।

२१. **पा रक्षणे–**
पाति नृपतिः प्रजाः।

२२-२३. **रा ला आदाने–**
राति लाति वा खड्गं सिसंग्रामयिषुः गृह्णातीत्यर्थः। दाने इति केचित्।

२४. **दाप् लवने–**
दाति दात्रेण व्रीहीन् कृषकः, दिदासति।

२५. **ख्या प्रकथने–**
ख्याति आख्यानं कथकः, चाख्यायते।

२६. **प्रा पूरणे–**
प्राति पेटिकां पुस्तकेन शिष्यः पूरयतीत्यर्थः।

२७. **मा माने–**
माति भूमिं नलेन ग्रामणीः। वृत्। भादिसमाप्त्यर्थं वृत्करणम्।

२८. **विद ज्ञाने–**
वेत्ति विद्वान् विषयदोषं; संपूर्वोऽकर्मको रुचादिः।

२९. **अस भुवि।**
भवनं भूः सत्ता विद्यमानतेति यावत्–अस्ति वास्तविकः स्वस्तिमान्।

३०. **मृजु शुद्धौ–**
मार्ष्टि मुखं जलेन धीरः।

३१. **वच भाषणे–**
वक्ति सूक्तं विवेकी, वचतीत्यादिप्रयोगादर्शनात् नोदाहृतं वक्तृ उल्का।

३२. **रुदिर् अश्रुविमोचने–**
रोदिति रमणी विमानिता वल्लभेन।

३३. **ञिष्वप शयने–**
स्वपिति युवती कान्तेन सह।

३४. **श्वस प्राणने–**
श्वसिति सम्यग् भिषक्प्रयोगादातुरः।

३५. **अन च–**
प्रपूर्वस्य प्रायेण प्रयोगः–प्राणिति पुण्यवान् बहूनि वर्षाणि।

३६. **जक्ष भक्षहसनयोः–**
भक्षणं भक्षः–जक्षिति राक्षसो नरशिरः। रुदिरित्यादिजक्षपर्यन्तो व्यवस्था।

३७. **जागृ निद्राक्षये–**
नायं ऋदनुबन्धः जागर्तेरिति निर्देशात्–जागर्ति यामिको राजसदने।

३८. **दरिद्रा दुर्गतौ–**
नायमादनुबन्धः दरिद्रातेरिति निर्देशात्।
दुर्गतिरिहाकिञ्चनीभावः–दरिद्राति दुर्देवहतकः, दरिद्रयति।

३९. **चकासृ दीप्तौ–**
चकास्ति चामीकरालङ्कृता कामिनी, चिचकासिषति।

४०. **शासु अनुशिष्टौ–**
अनुशासनं विनयनं–अनुशास्ति शास्त्रं शिष्यमुपाध्यायः। वृत्।
शासिपर्यन्ताः पञ्च जक्षादयोऽनभ्यस्ता अप्यभ्यस्ता इत्यर्थः।

४१. **चर्करीतं चेत्येके–**
चेक्रीयितलुकि धातुरदादिः परस्मैपदीत्यर्थः, बोभवीति बीभीतीत्यादयः प्रयोगतोऽनुसर्तव्याः। भाषायां प्रायः प्रयोगाभावादाह इत्येके इति परस्मैभाषाः।
अदप्रभृतयश्चर्करीतपर्यन्ताः परस्मैपदिन इत्यर्थः।

४२. **चक्षिङ् व्यक्तायां वाचि–**
इकारोऽयमुच्चारणार्थो न पुनर्नागमज्ञापनार्थः। कश्चिदाह आत्मनेपदप्रयोजनोऽयमिकारः। अनुदात्तो ङकारश्चानुबध्यते ततश्चोभयानुबन्धेन अनेन अन्य एकानुबन्धा अनित्यात्मनेपदा यथाप्रयोगमूहनीयाः–आचष्टे चतुरश्चारुकथां, कर्माणि आख्यायते, नृचक्षाः, विचक्षणः।

४३. **ईर गतौ कम्पने च–**

पृथग्विभक्तिश्चकारश्च सुखार्थः। केचित् पुनः कम्पन-स्यामुख्यत्वख्यापनार्थमित्याहुः।

ईर्ते नर्तकी ललितपदं, ऐरिरत् ईरिरिषति।

४४. **ईड स्तुतौ–**

ईट्टे पटुर्नृपभटम्।

४५. **ईश ऐश्वर्ये–**

ऐश्वर्यं ईश्वरीभवनं अधीनीकरणं वा-ईष्टे सम्राट् पृथिव्याः पृथिवीं वा, ईशा लाङ्गलदण्डः।

४६. **आस उपवेशने–**

आस्ते स्वस्थमना आसने, विद्यमानतायां पुनरस्य प्रायः प्रयोगः।

४७. **आङः शास इच्छायाम्–**

आशास्ते स्वस्ति वास्तविकः। केचिदमुमुदनुबन्धं पठन्ति, तेषां आशशासत्, अस्माकं तु आसीशसत्।

४८. **वस आच्छादने–**

वस्ते वस्त्रं स्नातः।

४९. **कसि गतिशातनयोः–**

शातनमिह ध्वंसनं–कंस्ते स्म कंसं कृष्णः।

५०. **णिसि चुम्बने–**

प्रणिंस्ते तरुणीवदनं युवा।

५१. **णिजि शुद्धौ–**

प्रणिंक्ते पात्रं पानीयेन पुमान्।

५२. **शिजि अव्यक्ते शब्दे–**

शिंक्ते शशिमुख्या हंसकः, (शिञ्जिनी)।

५३. **वृजी वर्जने–**

वृक्ते वृक्षं पक्षी।

५४. **पृची सम्पर्के।**

सम्पर्कः संयोजनं–संपृक्ते पवनः पुण्यगन्धेन। संपृक्ते

मधुना चूर्णं भिषगित्यन्तर्भूतेनार्थत्वात्।
पृजीत्येके–पृंक्ते, पिजि इत्येके–पिंक्ते।

५५. **षूङ् प्राणिगर्भविमोचने–**
प्रसूते सूतं गर्भिणी।

५६. **शीङ् स्वप्ने–**
शेते शिशुः शय्यायाम्।

५७. **इङ् अध्ययने–**
अधीते वेदान् ब्रह्मचारी।

५८. **दीधीङ् दीप्तिदेवनयो:–**
आदीधीते अनधांन: परेषाम्।

५९. **वेवीङ् वेतिना तुल्ये–**
आवेवीते विष्टि: परकर्म। केषाञ्चित् छान्दसावेतौ, शर्ववर्मणस्तु लोकप्रसिद्धशब्दान्वाख्याने विनिवेशितचेतसो दीधीवेव्यारिवर्णयकारयोरित्याचक्षाणस्य मते भाषायामप्यवसीयेते। आङ्पूर्वयोरेवानयो: प्रयोग:।

६०. **ह्नुङ् अपनयने–**
अपह्नुते परवित्तं चौर:। आत्मनेभाषा: (१७)।

६१. **द्विष अप्रीतौ–**
द्वेष्टि द्विष्टे वा पतिं भार्या।

६२. **दुह प्रपूरणे–**
प्रपूरणमिह प्रक्षारणं मोचना इति यावत्–दोग्धि दुग्धे वा गां पयो गोपालक:।

६३. **दिह उपचये।**
उपचयो वृद्धिभाव: तत्करणं वा–देग्धि दिग्धे देह: प्रतिदिनम्, उपचितो भवतीत्यर्थ:, देग्धि सौधं सुधया लेपक:, उपचितीकरोतीत्यर्थ:। संपूर्वोऽयं संशये–संदिग्धे स्थाणौ पुरुष:।

६४. **लिह आस्वादने–**
लेढि लीढे वा पद्मं मधु मधुलिट्।

६५. **ऊर्णुञ् आच्छादने–**
प्रोर्णौति प्राणाति प्राणुते वा रेणुभिराकाशं वायुः।

६६. **ष्टुञ् स्तुतौ–**
स्तौति स्तुते वा देवं सत्कविः। प्रपूर्वोऽयमवसरे, संपूर्वोऽयं परिचये। (अत्र तु वृत्तिहिंसयोरिति केचित् पठन्ति)।

६७. **ब्रूञ् व्यक्तायां वाचि–**
ब्रवीति ब्रूते वाग्मी सभायां मधुरं वचनम्।

विभाषिताः

लुम्बिकरणा अदादयः (जुहोत्यादिः)

१. **हु दाने–**
जुहोति हविरग्नौ कृष्णाय। दानमात्रपठितोऽपि देवतासंप्रदानकवह्न्यधिकरणवस्तुत्याग एव वर्तते।

२. **ञिभी भये–**
बिभेति व्याघ्रात् कातरः।

३. **ह्री लज्जायाम्–**
जिह्रेति गर्हितं कुर्वन् धीरः।

४. **पृ पालनपूरणयोः–**
पिपर्ति रामो दीनम्।

५. **ओहाक् त्यागे–**
जहाति निजं तेजः परैरभिभूतः, चक्रायितलुकि न दीर्घः–जहाति, जहेति। (जाहाति, जाहेति)

६. **घृ क्षरणदीप्त्योः–**
जघर्ति घृतं क्षरति दीप्यते वा घरति भौवादिकत्वात्। प्रयोगस्त्वनयोरप्रायिक एव।

७. **हृ प्रसह्यकरणे–**
प्रसह्यकरणं बलात्कारः–जहर्ति वित्तं एकाकिनो वर्त्मनि दस्युः।

८-९. **ऋ सृ गतौ–**
इयर्ति तीर्थं वीतरागः, इयृयात् ऐयृम, ससर्ति।

१०. **भस भर्त्सनदीप्त्योः–**
बभस्ति निस्तेजसं सर्वः।

११-१२. **कि कित ज्ञाने–**
चिकेति चिकेत्ति वा परवित्तं चतुरः।

१३. **तुर त्वरणे–** तुतोर्ति तरुणी कान्तमभिसर्तुं, तुरितं, तोरितम्।

१४. **धिष शब्दे–**

दिधेष्टि पटह आहवे।

१५. **धन धान्ये–**

दधन्ति धरणा, धान्यम् उत्पादयतीत्यर्थः, धान्यविषयभावना इह धान्यम्।

१६. **जन जनने–**

जजन्ति जीमूतः प्रावृषि, जजन्तः जज्ञति। छान्दसोऽयमुच्यते परैः। ऋसृवर्जं घृप्रभृतयश्छान्दसा इत्येके।

परस्मैभाषाः।

१७. **णिजिर् शौचपोषणयोः–**

नेनेक्ति नेनिक्ते वा पत्रं पुत्रं वा पिता।

१८. **विचिर् पृथग्भावे–**

वेवेक्ति वेविक्ते वा पिकः काकात्, विवेकः।

१९. **विष्लृ व्याप्तौ–**

वेवेष्टि वेविष्टे वा दिशा वर्षासु मेघः, विष्णुः।

२०. **डुदाञ् दाने–**

ददाति वित्तं दाता द्विजेभ्यः, दत्ते।

२१-२२. **डुधाञ् डुभृञ् धारणपोषणयोः–**

दधाति विधुर्धवलं धाम, धत्ते, बिभर्ति बिभृते भृत्रिमः।

उभयतोभाषाः

२३. **माङ् माने शब्दे च–**

मिमीते महीं नलेन।

२४. **ओहाङ् गतौ–**

जिहीते जह्नुतनयां जितेन्द्रियः।

आत्मनेभाषौ।

इति दुर्गसिंहोक्तगणवृत्तौ लुग्विकरणा अदादयः

(लुग्विकरणाः अदादयः श्लुविकरणाः जुहोत्यादयः)

दिवादिगणः

१. **दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु–**

क्रीडा खेलनं, विजिगीषा विजयेच्छा, व्यवहारः क्रयविक्रयलक्षणः, द्युतिः शोभा, स्तुतिरध्यारोपगुणकथनं, कान्तिरिच्छा,

गतिः पादविहरणं–

दीव्यति दिवि देश्वः। द्युतिविहारान्येषु सकर्मकोऽयं। द्यौः दिवा दिवस इत्यादि रूढौ।

२. **षिवु तन्तुसन्ताने–**

तन्तुभिः सन्तानो ग्रथनमित्यर्थः–सीव्यति वसनं शौचिकः।

३. **स्रिवु गतिशोषणयोः–**

स्रीव्यति श्रियं नीतिमान्।

४-५. **ष्ठिवु क्षिवु निरसने–**

ष्ठीव्यति वधूर्बकुलमतिरिक्तं, क्षीव्यति।

६. **ष्णुष अदने–**

स्नुष्यति स्नुषा केवलान्नम्।

७. **क्नसु ह्वरणदीप्त्योः।**

ह्वरणमिह कौटिल्यं–क्नस्यति काञ्चनालङ्कारेण कुमारी। मानुबन्धोऽयम्।

८. **नृती गात्रविक्षेपे।**

अकर्मकोऽयं–नृत्यति नर्तकी सातिशयम्।

९. **त्रसी उद्वेगे–**

त्रस्यति कातरः तीव्रसंग्रामात्।

१०. **कुथ पूतिभावे–**
कुथ्यति दुरितमामिषम्।

११. **पुथ हिंसायाम्–**
पुथ्यति रिपुं शक्तः।

१२. **गुध परिवेष्टने–**
गुध्यति वल्ली विटपिनम्।

१३. **क्षिप प्रेरणे–**
क्षिप्यति पापेन परितः शरान्।

१४. **पुष्प विकसने–**
पुष्प्यति कलिका कुन्दस्य माघे।

१५-१७. **तिम ष्टिम ष्टीम आर्द्रभावे–**
तिम्यति स्तिम्यति स्तीम्यति वा वस्त्रं बहिर्वर्षणेन, तेमनम्।

१८. **व्रीड चोदने–**
चोदनं प्रेरणं लज्जा तु अभिधीयते–व्रीड्यति वरो वधूं नवीनां, लज्जायामकर्मकः–व्रीड्यति नवोढा।

१९. **इष गतौ–**
अनोः प्रायेण प्रयोगः–
अन्विष्यति शिशुं जननी।

२०-२१. **षह षुह शक्तौं–**
शक्तिरिह क्षमा–सह्यति सुह्यति वा सह्यवचनं चतुरः।
सुहिरयं न प्रयुक्त इत्येके।

२२-२३. **जृष् झृष् वयोहानौ।**
वयोहानिरिह गतबहुवयोभावः–
जीर्यति झीर्यति वा विधवा दुःखमनुभवन्ती, जरा झरा जर्जरः झर्झरः।

२४. **शो तनूकरणे-**
श्यति शोभनम् असिं असिधावकः।

२५. **छो छेदने–**
छ्यति कच्छपं पुष्यायां वास्तविकः।

२६. **षो अन्तकर्मणि–**
अवस्यति समये यमो जन्तून्।

२९. **दो अवखण्डने–**
अवपूर्वस्य प्राय: प्रयोगदर्शनादवपूर्ववानयं–द्यति अवद्यति वा दशनेन वधूनामधरं युवा, अवदाय:।

२८-२९. **राध साध संसिद्धौ।** राधिरिह विप्रश्नेऽपि–
राध्यति राज्ञे गणक:, राध्यति साध्यति वा ओदन: निष्पन्नीभवतीत्यर्थ:।

३०. **व्यध ताडने–** विध्यति।

३१. **मृग अन्वेषणे**–मृग्यति मृगान् मृगयु:। केचिदस्य अमर्गीदिति मन्यन्ते, अमार्गीदिति तु मार्ग अन्वेषणे इत्यनेन।

३२. **पुष पुष्टौ–**
पुष्यति पुष्या प्रयागे प्रयोजनम्।

३३. **शुष शोषणे–**
शुष्यति सागर: समये।

३४. **दुष वैकृत्ये–**
दुष्यति दारकर्मणा कृपण:।

३५. **श्लिष आलिङ्गने–**
श्लिष्यति शीते शयित: सयौवनां विलासी।

३६. **ष्विदा गात्रप्रक्षरणे–**
स्विद्यति दयिता हृदये ईशेनोपगूढा।

३७. **क्षुध बुभुक्षायाम्–**
क्षुध्यति निर्धन: पथिषूपोषित: शाकादिकम्।

३८. **शुध शौचे–**
शुध्यति ताम्रमम्लेन।

३९. **षिधु संसिद्धौ–**
सिध्यति शुभकालप्रयातस्य कार्यम्।

४०. **रध हिंसायां च-**
चकारो निष्पत्यनुकर्षणार्थ:। रध्यति।

४१. **तृप प्रीणने–**
तृप्यति तन्वी सुरतेन।

४२. **दृप हर्षणमोचनयोः–**
दृप्यति दानवबलं मदिरया।

४३. **मुहि वैचित्ये।** वैचित्त्यं ज्ञानशून्यता–मुह्यति शोकाकुला महिला।

४४. **द्रुह जिघांसायाम्–**
द्रुह्यति दारुणः सुजनमपि।

४५. **ष्णुह उद्गिरणे–**
स्नुह्यति स्निग्धो मधुरवचः, सुस्नुक्षति सुस्नोहिषति।

४६. **ष्णिह अप्रीतौ (प्रीतौ, रमा) –**
स्निह्यति संसारे सत्पुरुषः।

४७. **णश अदर्शने–**
नश्यति दीनो दुर्भिक्षे।
वृत्। रधादिमुहादिसमाप्तौ इदं वृत्करणं, तत्र रधादि-रष्ट मुहादिः पञ्च।

४८-४९. **शमु दमु उपशमे–**
शाम्यति दाम्यति शिखी वर्षेण, प्रशान्।

५०. **तमु काङ्क्षायाम्–**
ताम्यत्यन्नं आकाङ्क्षाविषयो भवतीत्यर्थः। सकर्मकोऽपि दृश्यते–ताम्यत्यन्नं बुभुक्षितः वाञ्छतीत्यर्थः, प्रतान्।

५१. **श्रमु तपसि खेदे च–**
श्राम्यति तीर्थे तपस्वी, तपस्यति खिद्यति वेत्यर्थः।

५२. **भ्रमु अनवस्थाने–**
भ्राम्यति पद्मिनीनामुपरि भ्रमरः।

५३. **क्षमु सहने–**
क्षाम्यति द्विजापराधं धार्मिकः, कैश्चिदयमूदनुबन्धः पठ्यते, क्षंस्यति क्षमिष्यति।

५४. **क्लमु ग्लानौ–**
क्लाम्यति पथिकस्तृषाकुलः।

५५. **मदी हर्षे–**

माद्यति मधुना मधुमासे रसिक:।

एतेऽष्टौ शमादय:।

केचिदत्र वृतं पठन्ति, न तत् कात्यायनमतं अष्टग्रहणात्।

५६. **असु क्षेपणे–**

इषून् अस्यति लक्ष्ये धानुष्क: अणसुध-चीत्यादिना (का 3.2.27) अणपुषादिष्वस्य पाठस्तु सान्तोदनुबन्धप्रस्तावादेव।

५७. **यसु प्रयत्ने–**

यस्यति योगी परमात्मचिन्तायाम्।

५८. **जसु मोक्षणे–**

जस्यति वत्सं गोपालक:।

५९-६०. **तसु दसु उत्क्षेपे–**

तस्यति दस्यति स्म वा दशानन: कैलासम्।

६१. **वसु स्तम्भे–**

वस्यति वसुधामनन्त:।

६२. **प्युष विभागे–**

प्युष्यति पितृधनं भ्रातृवर्ग:।

६३. **प्लुष दाहे–**

प्लुष्यति वनमग्नि: अप्लुषत्। प्रुषो भौवादिकस्य लत्वे अपुषादित्वात् अप्लोषीत्। केचिदमुमुदनुबन्धं पठित्वा प्लुष्ट: प्लुष्ट्वा प्लोषित्वेत्यादिकमुदाहरन्ति।

६४. **बिष प्रेरणे–**

बिष्यति।

६५. **कुष श्लेषणे–**

कुष्यति कोमलांगीं कामुक:। अस्यैव क्तान्तस्य पक्षे दान्तस्य प्रयोगे स्त्रीवृत्तस्य नदादित्वादीप्रत्ययो भवति। अन्त्यस्येत्वे कुषिता कुषिदी इति प्रयोग:।

६६. **बुष उत्सर्गे–**

बुष्यति बुषं कृषक:, कडङ्गरं त्यजतीत्यर्थ:।

६७. **मसी परिमाणे–**
मस्यति माषं माषं कृत्वा वणिक्, मस्तः, मस्तकः, मसी, मासः।

६८. **लुट विलोटने–**
लुट्यति कटकभूमिषु कातरः।

६९. **उच समवाये–**
उच्यति त्रिसवनेन कचस्तपस्विनां, उग्रः, ओक इत्यादि।

७०-७२. **भृशु भ्रशु भ्रन्शु अधःपतने–**
भृश्यति भ्रश्यति भ्रंश्यति वा शाखायां एकं फलं वातेन भूमौ, बभर्श बभ्राश बभ्रंश।

७३. **वृश वरणे–**
वृश्यति वरं स्वयम्वरा, अवीवृशत्।

७४. **कृश तनूकरणे–**
कृश्यति कलानिधिं कृष्णपक्षः।

७५. **ञितृष पिपासायाम्–**
तृष्यति पथिकः पानीयं, तृष्णक्।

७६-७७. **तुष हृष तुष्टौ–**
तुष्यति हृष्यति वा प्रियवचनेन विपश्चित्, अहृषत्। हृषु आलीक्ये इत्यस्य तु अहर्षीत्।

७९-८०. **कुप क्रुधा रुष रोषे–**
कुप्यति क्रुध्यति रुष्यति वा मानिनी रमणायापराधिने।

८१. **डिप क्षेपे–**
डिप्यति पत्तिः परबले इषून्। अडिपीत् इति तौदादिकस्य।

८२. **ष्टुप समुच्छ्राये–**
स्तुप्यति धान्यं कृषकः राशीकरोतीत्यर्थः।

८३. **गुप व्याकुलत्वे–**
गुप्यति गाः प्रान्तरे वातवर्षम्, आकुलीकरोतीत्यर्थः।

८४-८६. **युप रुप लुप विमोहने–** युप्यति रुप्यति लुप्यति वा मतिमविदुषां संभ्रमः व्यामोहयतीत्यर्थः।

८७. **लुभ गार्ध्ये–**
लुभ्यति लावण्यवतीं युवा, आकाङ्क्षतीत्यर्थ:।

८८. **क्षुभ सञ्चलने–**
क्षुभ्यति पयोधिरिन्दूदये। अक्षुभदिति द्युतादिपठितेनैव सिद्धे यदिदं पुषादौ पठ्यते तदयं भान्तसाहचर्यादित्यवधेयम्। अक्षोभीदित्यादिप्रयोगनिरासार्थमिति तु न परीहार: तस्यापि क्षुभ्नादिनाऽवश्यमभ्युपगमात्।

८९-९०. **णभ तुभ हिंसायाम्–**
नभ्यति तुभ्यति वा भयानकं दुष्टो भट:।

९१. **क्लिदू आर्द्रभावे–**
क्लिद्यति जरया पुरुष:

९२. **ञिमिदा स्नेहने–**
मेद्यति मुदिरो (मेध:) वर्षासु।

९३. **ञिक्ष्विदा मोचने च।** चकारात् स्नेहनेऽपि–
क्ष्विद्यति तुषेभ्यस्तण्डुलान्।

९४. **ऋध् वृद्धौ–**
ऋध्यति विधुरनुदिनं शुक्लपक्षे।

९५. **गृधु अभिकांक्षायाम्–**
गृध्यति धनं दरिद्र:। वृत्। पुषादिसमाप्त्यर्थं। पुषादि:। ६४

परस्मैभाषा:।

९६. **षूङ् प्राणिप्रसवे–**
सूयते पुत्रं ब्राह्मणी। प्राणिग्रहणमतन्त्रं–सूयते कुसुमं शाखेत्यपि। यद्यपि प्रसवो गर्भमोचनं तच्च प्राणिविषयकमेव तथापि आविर्भावमात्रेऽपि।

९७. **दूञ् परितापे–**
दूयते दैन्येन मनस्वी।

९८. **दीङ् क्षये–**
दीयते दारिद्र्यमुद्योगिन:, दिदीये।

९९. **धीङ् अनादरे–** धीयते धार्मिकमसज्जन:।

१००. **मीङ् हिंसायाम्–**
मीयते मित्रं दुश्चरित्रः, मेतुम्।

१०१. **रीङ् स्रवणे-**
रीयते गर्गरीतो घृतं, रिर्ये।

१०२. **लीङ् श्लेषे–**
लीयते शशिनः कला सूर्येऽमावास्यायाम्।

१०३. **डीङ् गतौ–**
डीयते डीनः।

१०३. **व्रीङ् वरणे-**
व्रीयते वरं कन्या।
स्वादय ओदनुबन्धाः। तेन नत्वम्।

१०४. **पीङ् पाने–**
पीयते पयः पिपासुः, अपेष्ट, पिप्ये, पेतुम्।

१०५. **माङ् माने–**
मायते मेदिनीं हस्तेन स्थपतिः।

१०६. **ईङ् गतौ–**
ईयते ग्राममसौ, ऐष्ट, अयांञ्चक्रे। अन्ये अत्राभ्यस्तवद्भावे ईये इत्युदाहरन्ति।

१०७. **प्रीङ् प्रीतौ–**
प्रीयते सत्यवचनेन साधुः, अप्रेष्ट, प्रेतुम्।

१०८. **जनी प्रादुर्भावे–**
जायते, जनिष्णुः।

१०९. **दीपी दीप्तौ–**
दीप्यते प्रदीपो निर्वातदेशे, दीप्रः।

११०. **पूरी आप्यायने–**
पूर्यते कुम्भं पयसा भृत्यः।

१११. **जूरी जीर्णे**–जरणं जीर्णं वयोहानिः–
जूर्यते वृद्धः, हीनवया भवतीत्यर्थः।

ûûü- **तूरी त्वरणहिंसयोः –**
तूर्यते तीव्रहस्ती, त्वरते हिनस्ति वेत्यर्थः, अतूरिष्ट।

११३-११५. **धूरी गूरी घूरी हिंसार्थाः–**
धूर्यते गूर्यते घूर्यते वा व्यालः सत्त्ववान्, धूर्णः, गूर्णः, घूर्णः।

११६. **शूरी स्तम्भे च**–हिंसापेक्षया चकारः–
शूर्यते संग्रामे रिपून् शूरः, स्तभ्नाति हिनस्ति वेत्यर्थः।

११७. **चूरी दाहे–**
चूर्यते शम्बूकं चूर्णकारः, चूरः।

११८. **तप ऐश्वर्ये** -
अत्र वा ग्रहणं पठित्वा तप धूप सन्ताप इत्यस्य भ्वादिपठितस्य ऐश्वर्ये दिवादित्वमात्मनेपदित्वं च पक्षे विधीयते इति व्याचक्षाणा अविचक्षणा अस्यार्थस्य वाग्रहणमन्तरेणापि इहोपदेशादेव लाभमपश्यन्त आत्मानमेवोपहसन्ति। अपरे तु वाग्रहणं परेण सम्बन्धयन्ति वृतु वर्तन इति। अस्य भ्वादौ द्युतादिपठितस्य वरणेऽनेकार्थत्वेन सिद्धस्यापि पक्षे यन् सिच् इडर्थं व्याचक्षते इत्यपि न संगतं पूर्वोक्तादेव हेतोः। अन्ये तु वाग्रहणात् यनर्थमेव दिवादित्वं न तु द्युतादिवृतादिनिबन्धननिषेधार्थमिति मन्यन्ते। तदपि नागममूलमित्युपेक्षते। तदस्माकं वावृतु वरणे इत्यनेकस्वर उदनुबन्धधातुर्धीविषयतां धावति। तथा च वृत्ते तु वृत्तवावृत्तौ ततो वावृत्यमानाऽसौ इति च संगच्छते।
तप्यते नृपतिः प्रतापवानवनिमण्डले। नायं तपिः पतिरित्येके यस्य पतिरित्ययं प्रयोगः।

११९. **वावृतु वरणे–**
वावृत्यते वरं पतिंवरा, विवावर्तिषते।
यदि तु वृत्यते वरं पतिंवरा इति साधु तदा वृतेरेव दिवादिपाठोऽङ्गीकरणीयः सिजादिरपि।

१२०. **क्लिश उपतापे–**
क्लिश्यते स्वकर्मभिरविनेता, क्लिश्यते कृपणः स्ववर्गमपि इति सकर्मकोऽपि, चिक्लिशः।

१२१. **काशृ दीप्तौ–**
काश्यते काशैः शरदरण्यम्।

१२२. **वाशृ शब्दे -**

सामान्यत: पठितोऽपि तिरश्चामेव शब्देऽभिधानात्–वाश्यते वामत: शिवा। एतावननुबन्धावित्येके, तदा अचीकशत् अवीवशत्।

१२३. **पद गतौ–**

पद्यते पदाति: कटकम्। उपसर्गपूर्व: प्रायेण प्रयुज्यते यथायथमर्थान्तरे संपद्यते निष्पद्यते जायते इत्यर्थ: अभिपद्यते जानातीत्यर्थ:, विपद्यते विनश्यतीत्यर्थ: एवं प्रयोगादूह्यम्।

१२४. **खिद दैन्ये–**

खिद्यते क्षुधया बाल:।

१२५. **विद सत्तायाम्–**

विद्यते वित्तं वणिजां, अवित्त, विविदे।

१२६. **बुध अवगमने–**

बुध्यते बुद्धिमान् सूक्ष्ममर्थं, भोत्स्यमान:।

१२७. **युध संप्रहारे–**

युध्येते योधौ सांग्रामिकनयेन रणभूमौ। अभिमुखगतयोरन्योन्याभिभवेच्छा इह संप्रहार इति मुख्योऽर्थ:, तत्र कदाचिदेकस्य सहभाव-नियोग:–युध्यते योध: परेण, कदाचिदभिहनने–युध्यते शत्रुमभिहन्तीत्यर्थ:, सहयुध्वा।

१२८. **अनौ रुध कामे–**

अनावुपपदेऽभिलाषेऽर्थे रुधिरयमात्मनेपदी दिवादिरित्यर्थ:–अनुरुध्यते रुद्धसंपदं स्वयमर्थोपार्जक:, अनुरुद्ध:।

१२९. **मन ज्ञाने–**

मन्यते आम्नायं मतिमान्।

१३०. **अन प्राणने–**

अन्यते पानीयेन प्राणी, आनिष्ट, आने। केचिदमुं न पठन्ति।

१३१. **युज समाधौ–**

समाधिरिह योग्यीभाव:–युज्यते युवतिषु यूनामनुराग:।

१३२. **सृज विसर्गे–**
विसर्ग इह त्यागः। तत्र व्युद्भ्यामेव वर्तते अन्यत्र
करोत्यर्थः–सृज्यते मालां धार्मिकः।
सृजः श्रद्धोपनयनक्रियायामेवाभिधानं असृष्ट
श्रद्धोपनयनक्रियायां कर्त्तरि च असर्जि मालां धार्मिकः।

१३२क. **लिश अल्पीभावे**–लिश्यते पल्वलं निदाघे,
अल्पीभवतीत्यर्थः। आत्मनेभाषाः।

१३३. **शक मृष क्षमायाम् –**
क्षमेहोपेक्षा–शक्यति-ते मृष्यति-ते वा द्विजापराधं साधुः।
इह चकारमनर्थविदः पठन्ति।

१३४. **ईशुचिर् पूतिभावे -**
पूतिभाव इह चिरेण मधुरस्याम्लीभावः – शुच्यति-ते वा
चम्पकदलं चिरेण।

१३५. **णह बाधने–**
नह्यति-ते कवचमङ्गे भटः, निनत्सति-ते, उपानत्।

१३६. **रञ्ज रागे–**
रज्यति-ते युवा युवत्या। राग इहानुरागः तात्पर्यमिति यावत्।
क्वचिद् वर्णान्तरापादानं–रज्यति पटं नटः,
क्वचिल्लोहितीभावः–रज्यति लोहितीभवतीत्यर्थः, अरङ्गीत्
अरंक्त।

१३७. **शप आक्रोशे–**
शपति-ते पिशुनः साधून्, निभर्त्सयतीत्यर्थः।
विभाषिताः। शकादय उभयपदिन इत्यर्थः इति

दुर्गसिंहोक्तगणवृत्तौ यन्विकरणा दिवादयः समाप्ताः।

स्वादयः

१. **षुञ् अभिषवे –**
अभिषव इह पीडनं मन्थनं–अभिषुणोति–षुणुते सुरां शौण्डिकः, विलोडयतीत्यर्थः।

२. **षिञ् बाधने–**
सिनोति सिनुते वा केशान्–कन्याया जननी, सायकः, सितिः।

३. **शिञ् निशाने–**
शिनोति शिनुते वा असिं असिधारकः, शयः।

४. **डुमिञ् प्रक्षेपणे–**
मिनोति, मिनुते वा मरिचं मांसतेमने, माता, मात्रिमम्।

५. **चिञ् चयने।** चयनमिह राशीकरणम्–
चिनोति चिनुते वा चणकान् कृषकः।
निर्पूर्वोऽयमवधारणे--निष्चिनोति पदार्थान् विपश्चित्।

६. **स्तृञ् आच्छादने–**
स्तृणोति स्तृणुते वा वस्त्रेण मस्तकं वधूः। वातप्रमी वातमृगे भवेज्जलभूवि स्तराः। ययोरश्वे पपारर्क तन्द्रानिद्राप्रमालयोरिति दशनादुणादावाः।

७. **कृञ् हिंसायाम्–**
कृणोति कृणुते वा कापटिकः कोमलहृदयम्। अस्मिन्नस्य पाठो विकरणार्थ एव, अन्यथा उपाकृतः पशुरसौ योऽभिमन्त्यृक्रतौ हत इत्यादिप्रयोगोऽनेकार्थेन करोतिना सिद्ध एव।

८. **वृञ् वरणे–**
वृणोति वृणुते वा वरं देवान् साधकः।

९. **धुञ् कम्पने।** कम्पनमिह कम्पना–
धुनोति धुनुते वा धवित्रम्। ऊर्ध्वं धूनोति वायुरिति प्रयोगात् दीर्घान्त इति केचित्।
उभयतोभाषा:।

१०. **टुदु उपतापे–**
दुनोति हृदयं दयिताविरह:।

११. **हि गतौ वृद्धौ च–**
प्रहिणोति वार्त्तां विदेशस्थ:, हिमं, हेमं, हय:। हिनोति बुद्धिरभ्यासादित्यादिप्रयोग:। चकार उपतापानुकर्षणार्थ इत्येके।

१२. **पृ प्रीतौ–**
पृणोति प्रियं प्रियवादिनी, अपार्षीत्।

१३. **स्पृ पालने च –**
प्रीतौ चकारात्–स्पृणोति नृप: प्रजा:।

१४. **आप्लृ व्याप्तौ–**
आप्नोति पुण्येन पुरुषो यश:, आपो जलम्।

१५. **शक्लृ शक्तौ–**
शक्नोति साकारमाराधयितुं धीमान्, शक्र:।

१६–१७. **राध साध संसिद्धौ–**
राध्नोति साध्नोति वा धनमुद्योगिनाम्। साधिरिहाषोपदेष एव सृपिसृजीत्याद्युक्तं यत् तदुपलक्षणम्।

१८–२९. **तक तिग षध रिक्ष कृवि चिरि जिरि दास द्रु जिघांसायाम्–**
तिक्नोति तिग्नोति वा आहवे परबलं भट: शरै:।
एतावास्कन्दने इत्येके, परे कृविवर्जिताश्छान्दसा:। रिक्षस्थाने ऋघं (?) पठन्त्येके। चिरिजिरी नेदनुबन्धौ इदन्तावनेकस्वरौ सध्नोति रिक्ष्णोति चिरिणोति जिरिणोति दास्नोति द्रुणोति। कृविरिह प्रयुक्तो भाषायां इदनुबन्धोऽयं विकरणे कृभावो वक्तव्य:–कृणोति दीनान् बलवत्तर:, चकृण्व, चिकृण्विषति, चरीकृण्व्यते।

३०. **ञिधृषा प्रागल्भ्ये–**

धृष्णोति सभायां पटुः, धृष्णक्, धृष्णुः।

३१. **दन्भु दम्भे –**

दम्भो मिथ्याविकत्थनं–दभ्नोति दुष्प्रगल्भोऽविदग्धसभायाम्।

३२. **ऋधु वृद्धौ–**

ऋध्नोति विधुः।

३३-३४. **धिवि तृप प्रीणने–**

धिनोति धीरान् धर्मः, दिधिन्व, धिन्वुवत् (?)।

तृप्नोति इह न णत्वं क्षुभ्नादिपाठात्।

परस्मैभाषाः।

दुप्रभृतयः परस्मैपदिन इत्यर्थः।

३५. **अशू व्याप्तौ–**

अश्नुते पयः सर्वं प्रलये, आशिष्ट, अशिक्षते, अशिशिषते।

३६. **ष्टिघ स्कन्दने–**

स्कन्दनमवगाहनं–स्तिघ्नुते सरसीं धर्मसमये धर्मार्तः, अस्तेघिष्ट।

आत्मनेभाषौ।

इति दुर्गसिंहोक्तगणवृत्तौ नुविकरणाः स्वादयः समाप्ताः।

तुदादिगणः

१. **तुद व्यथने–**
तुदति-ते मनोभवेन कामातुरा।

२. **णुद प्रेरणे–**
प्रणुदति- ते घोटकं तोत्रेण। अस्मन्मते भाषायां नुदधातोः परस्मैपदमेव भवति यत् तु विभाषितमध्ये पाठः तत् परमतानुवादेन।

३. **दिश अतिसर्जने।** अतिसर्जनमाज्ञापनम्–
आदिशति-ते संग्रामे गन्तुं वीरान् नृपतिः।

४. **भ्रस्ज पाके–**
भृज्जति-ते राजीवं राजीवलोचना।

५. **क्षिप प्रेरणे–**
क्षिपति-ते बाणं रणभूमौ भटः।

६. **कृष विलेखने–**
कृषति-ते क्षेत्रं कृषकः।

७. **मुच्लृ मोक्षणे–**
मुञ्चति-ते अस्त्रं कञ्चुकी।

८. **लुप्लृ छेदने–**
लुम्पति-ते कदलीं खड्गहस्तः।

९. **विद्लृ लाभे–**
विन्दति-ते वा गोविन्दः शरीरम्।

१०. **लिप उपदेहे।** उपदेह उपचयः–लिम्पति-ते वपुश्चन्दनेन।

११. **षिच क्षरणे–**
सिञ्चति-ते व्रीहीन् वारिवाहः। विभाषिताः।

१२. **कृती छेदने–**
कृन्तति तनुं तुण्डेनाण्डजः।

१३. **खिद परिघाते–**
खिन्दति खलः कुशलबुद्धिम्।

१४. **पिष अवयवे–**
पिंशति तण्डुलान् सूपकारः।
वृत्। मुचादिगणसमाप्त्यर्थं वृत्करणम्।

१५-१७. **रि पि ऋषी गतौ -**
रियति राज्ञः पादप्रक्षालनाय दासः, पियति ऋषति ऋष्टिः।

१८. **धि धारणे–**
धियति धिया साधुः सदुपन्यासम्।

१९. **क्षि निवासगत्योः–**
क्षियति लक्ष्मीरक्षतनये, प्रक्षीय।
केचित् तु क्षि क्षये इत्यस्यैव दीर्घमिच्छन्ति तदा प्रक्षित्य।

२०. **षू प्रेरणे–**
सुवति मतिं शुभकर्मणि साधुः।

२१. **व्रश्चू छेदने–**
वृश्चति वृक्षं वर्धकिः।

२२. **ऋछ गतीन्द्रियप्रलयमूर्तिभावेषु -**
इन्द्रियाणां प्रलयः, गतिश्च इन्द्रियप्रलयश्च मूर्तिभावश्च इति विग्रहः। ऋच्छति मूर्छां वत्सः प्रहारेण गच्छतीत्यर्थः, पश्चिमावस्थामाश्रितस्य इन्द्रियमृच्छति प्रलीयत इत्यर्थः, मूर्तिः काठिन्यं मूर्तेर्भाव उत्पत्तिः कर्तुः काठिन्यसम्पत्तौ ऋछधातुर्वर्तते इत्यर्थः, घृतमृच्छति हेमन्ते, कठिनं भवतीत्यर्थः, संपूर्वोऽकर्मको रुचादिः समृच्छते।

२३. **कॄ विक्षेपे–**
किरति शरान् शूरः परसैन्ये, चेकीर्यते।

२४. **गॄ निगरणे।** निगरणमभ्यवहारः–
गिरति गिलति वा यवागूमौदरिकः।

२५. **उछी विवासे–** विवासोऽतिक्रमः अन्तगमनमिति यावत्–
उच्छति वाञ्छा विरागिणः।

२६-२८. **जर्च चर्च झर्झ परिभाषणतर्जनयोः–**
जर्चति चर्चति झर्झति वा वीरः परसैन्यम्।

२९. **त्वच संवरणे–**
त्वचति चर्म शरीरम्।

३०. **ऋच स्तुतौ–**
ऋचति ऋचा कृष्णचरणम्।

३१. **उब्ज आर्जवे–**
उब्जति कुब्जा कृष्णधृतचिबुका, समुब्जः। अस्य नामिनोर्वोरित्यादिना न दीर्घोऽनित्यत्वात् क्विपि उव् इति प्रमाणबलात्।

३२. **उज्झष् उत्सर्गे–**
गुरोश्च निष्ठासेट इति सिद्धे अङर्थषानुबन्धकरणमनर्थकमेव किन्तु छन्दस्यनुबन्धकृतस्वरविशेषसंपादनार्थमिति परानुवादार्थम्। उज्झति मुह्यमानो बाह्येषु न तृष्णाम्। धातुपारायणकारस्तु जलमुज्झति जलादिन्तुदाजहार एतदेवाम्नायविदां हृदयंगममेवास्माकं प्रतिभाति। सोपधोऽयमिति वदन्नशेषविदुषामुपहास्यो भवति।

३३. **लुभ विमोहने–**
विलुभति भव्येन कातरः।

३४. **रिफ कथनयुद्धनिन्दाहिंसादानेषु–**
रिफति झरद्द्विरेफः, रेफोऽधमः। युद्धेन भावनिष्ठान्तेन क्रियाभिधानं युद्धे निन्देति केचित्।

३५-३६. **तृफ तृन्फ तृप्तौ–**
तृफति तृम्फति वा फाण्टमुपयुञ्जानो जनः।

३७-४२. **तुप तुन्प तुफ तुन्फ ऋफ ऋन्फ हिंसार्थाः–**
तुपति तुम्पति तुफति तुम्फति ऋफति ऋम्फति वा वैरिणं विरोधी।

४३-४५. **दृफ दृन्फ मिछ उत्क्लेशे–**
दृफति दृम्फति मिच्छति वा म्लेच्छः, शूलेन क्लिश्यतीत्यर्थः।

४६-४८. **गुफ गुन्फ दृभी ग्रन्थे–**
गुफति गुम्फति दृभति भद्रां मालां मालिकः, दर्भः, सन्दर्भः।

४९. **चृती हिंसायां च-**
चकाराद् ग्रन्थे च–चृतति चौरः साधून्।

५०-५१. **उभ उन्भ पूरणे–**
उभति उम्भति वा कुम्भं वारिणा दासः, उवोभ, उम्भाञ्चकार, उभौ, उभयम्।

५२-५३. **शुभ-शुन्भ शोभार्थे–**
शुभति शुम्भति वा सम्भावितः सदसि। शुभिरुचिभ्यां न स्यात् शुम्भतेरपि न चेक्रीयितम्।
वृत्। तृम्फादीनां शुन्भान्तानां संज्ञापूर्वत्वेन अनुषङ्गलोपाभाववतां परिच्छेदकरणार्थमित्यर्थः। तृम्फादि।

५४. **विध विधाने–**
विधति वेधा विविधकार्यम्। ताडनेऽप्यमनेकार्थत्वात् अत एव कर्णवेधः।

५५-५६. **जुड शुन गतौ–**
जुडति शुनति वा श्वा सत्वरमुच्छिष्टमुपभोक्तुम्।

५७-५८. **पृड मृड सुखने–**
पृडति मृडति वा विषयो रागिणम्।

५९. **पृण प्रीणने–**
पृणति पितृन् तर्पणेन गृही, पपर्ण।

६०. **मृण हिंसायाम्-**
मृणति सर्वान् मृत्युः।

६१. **द्रुण गतौ च**-चकाराद् हिंसायां–
द्रुणति दरिद्रं दारिद्र्यागमः, द्रुणः, द्रोणी, द्रोणः।

६२. **तुण कौटिल्ये–**
तुणति तृणं वातः कुटिलयतीत्यर्थः।

६३. **पुण शुभे-**
शुभे शुभक्रियायां पुणति पौराणिकः पुण्यतीर्थे शुभं, निपुणः।

६४. **मुण प्रतिज्ञायाम्-**
मुणति व्रतं मौनी प्रतिजानातीत्यर्थः मौनं, मुनिः।

६५. **कुण शब्दोपतापयोः-**
कुणति कोकिलः शब्दायते,
कुणति पिकः प्रवासिनं उपतापयतीत्यर्थः।

६६-६७. **घुण घूर्ण भ्रमणे-**
घुणति घुणः भ्रमतीत्यर्थः,
घूर्णति धर्मागमे रजनीजागरूकः प्राप्तनिद्रः प्रचलतीत्यर्थः।
सामान्येन पठितोऽपि विशेषे वर्तते लोकोपचारात्।

६८. **प्रछ ज्ञीप्सायाम्-**
पृच्छति पान्थः पन्थानं पथिप्रज्ञम्।

६९. **सृज विसर्गे-**
सृजति जगत् जगन्नाथः।

७०. **टुमस्जो शुद्धौ।** शुध्यतेऽनया शुद्धिराप्लवः-
मज्जति उषसि तापसस्तीर्थतोये।

७१. **रुजो भङ्गे-**
रुजति रोगश्चिरं पथ्यभोजिनः।

७२. **भुजो कौटिल्ये-**
भुजति भुजं शयित्वा शय्यायां, कुटिलं करोतीत्यर्थः।

७३-७४. **छुप स्पृश संस्पर्शे-**
छुपति स्पृशति वा बलात् पराङ्गनाङ्गं षिङ्गः।

७५-७६. **रुश रिश हिंसायाम्-**
रुशति रिशति वा रोषादरिसैन्यं वीरः।

७७-७८. **लिश विछ गतौ-**
लिशति विच्छति विच्छायति वा सुखं साधुः।
विच्छेस्तुदादिपाठसामर्थ्यात् सार्वधातुकेऽप्यायानित्यत्वं, अन्यथा विच्छायन्तीत्यायव्यवधाने नलोपासिद्धाविहोपदेशोऽनर्थकः

स्यात्। केचिदिहोपदेशसामर्थ्याद् व्यवधानेऽपि नलोपे विच्छायन्ती विच्छायतीत्याहुः।

७९. **विश प्रवेशने–**
विशति वेश्म ससंभ्रमा वधूः गौरवितमभिवीक्ष्य।

८०. **मृश आमर्शने–**
मृशति कृषकोऽवग्राहम्।

८१. **शक्लृ शातने–**
शातनमिति ज्ञापकात् स्वार्थे इन्, शतनं शातनं च स्वार्थः, शदिरनीति आत्मनेपदं–शीयते समये तरुः, पततीत्यर्थः। भ्वादिपठितस्य पुनरिह पाठः प्रपञ्चार्थः। स्वरार्थ इत्यपरः। आत्मनेपदानित्यतायां शीयन्ती शीयतीत्येतदर्थमिति कश्चित्।

८२. **षद्लृ विसरणे–**
सीदति विषयी विरहेण।

८३. **षुर ऐश्वर्यदीप्त्योः –**
सुरति सुरभौ (ऋतौ) कुसुमेषुः, ईष्टे दीप्यते वा इत्यर्थः, सुरः सुरा।

८४. **कुर शब्दे–**
कुरति कुर्कुरः कुर्यते अकुर्छुरोरिति प्रतिषेधान् न दीर्घः, करोतेस्तु प्रतिषेधो लाक्षणिकस्यापि परिग्रहात्। केचिदमुं न पठन्ति, अन्यथा हि अयमेव प्रतिषेधस्यास्य विषयः स्यात्।

८५. **क्षुर छेदने–**
क्षुरति क्षुरेण केशान् नापितः।

८६. **मुर संवेष्टने–**
मुरति मेरुं प्रदक्षिणमावर्तमानो रविः, मुरः मुरारिः।

८७. **खुर विलेखने–**
खुरति खुरेण क्ष्मां तुरगः।

८८. **घुर भीमार्थशब्दयोः–**
घुरति घोणी जनमेकाकिनं, घुरति पारावतः शब्दायत इत्यर्थः, घोरः।

८९. **पुर अग्रगमने–**
पुरति पौराणां प्रामाणिक:, पुरा, पुर:।

९०. **वृहू उद्यमे–**
वृहति बहुसाधनो धनसाधने।

९१-९३. **तृहू ष्टृहू तृन्हू हिंसार्था:–**
तृहति स्तृहति तृंहति वा विषाणी वर्त्मनि बालम्।

९४. **इषु इच्छायाम्–**
इच्छति विष्णुभक्त: कृष्णभक्तिम्।

९५. **मिष स्पर्धायाम्–**
अन्योन्यं मिषति मेष:।

९६. **किल शैत्यक्रीडनयो:–**
किलति जलेषु केलिमान्, शीतो भवति क्रीडति वेत्यर्थ:।

९७. **इल गतौ–**
इलति वेला केलानां, इला, इल्वला।

९८. **हिल हावकरणे।** हाव:श‍ृङ्गारजो व्यापारविशेष:–
हिलति लीलावती पुरत: पतिम्।

९९-१०१. **शिल षिल उछि उञ्छे–**
शिलति सिलति उञ्छति वा क्षेत्रे व्रीहीन् तपस्वी चिनोतीत्यर्थ:।

१०२. **तिल स्नेहने–**
तिलति तैलेनाङ्गमङ्गनाया: स्निह्यतीत्यर्थ:।

१०३. **चिल वसने** -
वसनमाच्छादनं परिधानमिति यावत्–चिलति चीरं वननिलय:।

१०४. **चल विलसने–**
चलति चारुमुखी केलिनिकेतने।

१०५. **विल भेदने–**
विलति भित्तिं वात:, विलम्।

१०६. **णिल गहने–** गहनमिह दुर्बोधनम्।

निलति नयमनिश्चितबुद्धिः, दुःखेन जानातीत्यर्थः।

१०७. **मिल श्लेषणे–**

मिलति मल्लिकासु सायमामोदः, श्लेषणमिह समृद्धीभवनं न तु व्यापकमालिङ्गनं, मेलः।

१०८. **लिख लेखने–**

लिखति लेखकः पुस्तकं, लेखनीयः। कश्चित् कुटस्यादिः कुटादिरिति समासं मन्यमानो लिखनीयं लेखनीयमितीच्छति।

१०९. **कुट कौटिल्ये–**

कौटिल्यमिह कुटिलीभावः तत्करणं वा–

कुटति कनकस्य गुणं वणिक्, कोटः।

११०-१११. **पुट लुट संश्लेषणे।** संश्लेषणमिह सम्बन्धभावः–

पुटति लुटति वा चाटुर्वटुना (कटीषु पटी)।

११२. **कुच संकोचने।** समा प्रायेण प्रयोगः–

संकुचति कमलमभिसायम्।

११३. **व्यच व्याजीकरणे–**

विचति चामरेण चकोराक्षी सखीं, उरुव्यचाः।

११४. **गुज शब्दे–**

गुजति गमनारम्भे गोमुखम्।

११५. **गुड रक्षायाम्–**

गुडति मृडो निविडानुरागिणम्।

११६. **डिप क्षेपे–**

डिपति रणे बाणं सुधन्वा।

११७-१२१. **चुण चुट छुट छुर त्रुट छेदने–**

चुणति चुटति छुटति छुरति त्रुटति वा तृणं दशनैर्वृषभः। चुणतिरिह कैश्चित् न पठ्यते, अस्य क्विप् दृश्यते चेत् चुण् चुणौ चुण इत्यादि।

१२२. **स्फुट विकसने–** स्फुटति पुष्पं वसन्ते।

१२३. **मुट आक्षेपप्रमर्दनयोः–**

मुटति स्तिमितवसनं कृतस्नानः।

१२४. **तुट कलहकर्मणि–**
तुटति कटुवाक्यैरन्योन्यमितरजनः।

१२५. **जुड बन्धे–**
जुडति चूडां कडारकेशः।

१२६. **कड मदे–**
कडति कामुकः। डान्तप्रस्तावे कुटादिप्रयोजनाभावेऽप्युपदिश्यते।

१२७. **कूड घसने–**
घसनं मर्दनं–कूडति कामिनी मलिनमङ्गं तिलकल्केन।
अस्यापि कुटादौ न प्रयोजनम्।

१२८. **कुड बाल्ये च**–बाल्यमिह शिशुव्यापारः–
कुडति सिकताभिः शिशुकः।

१२९. **घुट प्रतीघाते–**
तुट कलहकर्मणीत्यतः परमस्योपादानमस्माकं–घुटति घोटकः
कटकं परेषां, प्रतिहन्तीत्यर्थः।

१३०. **तुड तोडने**–तोडनमुपहननं–
तुडति निविडमुङ्गरेण लोष्टं कृषकः।

१३१-१३४. **थुड स्फुड (स्थुड, रमा) वुड व्रुड संवरणे–**
थुडति स्फुडति वुडति व्रुडति वा अङ्गं वाससा बाला।

१३५. **द्रु (भ्रु) ड संघाते–**
भ्रुडति स्तम्भतृणानि स्थपतिः, गृहाय राशीकरोतीत्यर्थः।
कुड बाल्ये च इति पठितोऽपि पुनरिह पाठोऽर्थभेदादिति
केचित्, हुड इत्यपरे।

१३६. **स्फुर स्फुरणे–**
स्फुरणमिह चलनं प्रकाशो वा–स्फुरति परपरीवादो
वदनेऽसाधूनाम्।

१३७. **स्फुल सञ्चये च–**
स्फुरणापेक्षया चकारः–स्फुलति पुष्पं मालिकः। स्फुरेः
कपिरिकादित्वेनाङ्गीकारः कष्टावह इत्यस्य प्रतिपदपाठः।

१३८. **णू स्तवने–** परिणुवति कृष्णं नूतः।

१३९. **धू विधूनने–**
धुवति धातकीं वात्या, धूतः।

१४०. **गु पुरीषोत्सर्गे–**
गुवति गृह्यभूमौ जनः, गूनः।

१४१. **ध्रु गतिस्थैर्ययोः–**
ध्रुवति ध्रुवः स्वर्लोके।
परस्मैभाषाः।

१४२. **गुरी उद्यमे–**
गुरते गुरुकरवालं शत्रुं हन्तुकामः।

१४३. **कुङ् शब्दे–**
कुवते अकुत कुतः। केचिदमुं दीर्घं पठन्ति, तदा आकूतमित्यादयः प्रयोगाः, अस्माकं तु कथञ्चित् दीर्घेण समर्थनीयाः।
वृत्।
कुटादिगणच्छेदाय वृत्करणं। कुङशब्दे इत्यन्तः पञ्चत्रिंशत् कुटादिः।

१४४. **पृङ् व्यायामे–**
व्यायामो व्यापारः चेष्टेति यावत्–व्याप्रियते पुण्यवान् धर्मकृत्ये।

१४५. **मृङ् प्राणत्यागे–**
म्रियते मर्त्यः कालमासाद्य, मामूर्यते।

१४६. **दृङ् आदरे–**
आद्रियते गुरुं परिचर्यया शिष्यः। केचिदमुं मानुबन्धं पठन्ति।

१४७. **धृङ् अवस्थाने–**
ध्रियते धर्मः।

१४८. **जुषी प्रीतिसेवनयोः–**
जुषते यशो वशी।

१४९. **ओविजी भयचलनयोः–**
उद्विजते व्याघ्रात् जनः।

१५०-१५१. ओलजी ओलस्जी व्रीडे–

लजते लज्जते वा कुलवधूरधि गुरु। तवर्गपञ्चमादिरयमिति केचित्, तन्मते नग्नो विवासा इत्यस्यैव प्रयोगः, सिद्धान्ते तु वर्णविकारः। अनयोस्तुदादौ फलशून्योऽपि स्वरार्थ इति परः।

आत्मनेभाषाः।

इति दुर्गसिंहोक्तगणवृत्तौ अगुणविकरणास्तुदादयः समाप्ताः।

रुधादिगण:

१. **रुधिर् आवरणे–**
रुणद्धि रुन्धे वा रुधिरं रेणून् रणभूमौ।
प्रवेशनेअन्त:स्थापनपूर्वकावरणे वा
द्विकर्मकोऽयं–ग्राममवरुणद्धि व्रजम्।

२. **भिदिर् विदारणे–**
भिनत्ति भिन्ते वा बाणेन भट: परहृदयं, भित्तमिति खण्डे निपात:।

३. **छिदिर् द्विधाकरणे–**
द्विधाकरणं कियदवयवविभाग इति पृथग्योग:–छिनत्ति छिन्ते वा छागमस्तकं देव्या:।

४. **रिचिर् विरेचने–**
विरेचनं पौन:पुन्येन पुरीषोत्सर्ग:–विरिणक्ति विरिंक्ते वा, व्यरिणक्।

५. **विचिर् पृथक्भावे–**
विविनक्ति विविंक्ते वा युक्त्या पदार्थान् तार्किक:।

६. **क्षुदिर् संपेषणे–**
क्षुणत्ति क्षुन्ते वा उदूखलेन तण्डुलान् गृहिणी, चुक्षुत्सति-ते

७. **युजिर् योगे–**
युनक्ति युंक्ते वा नेता रणार्थं रथे तुरगान्।

८. **उछृदिर् दीप्तिदेवनयोः–**
देवनं यावद्दिवाऽय: क्रोडनमिति केचित् उभयानुबन्धोऽयं–
छृणत्ति छृन्ते वा वित्तवान् समितौ, छर्दि:।

९. **उतृदिर् हिंसायाम्–**
तृणत्ति तृन्ते वा मृगान् लुब्धकः।

१०. **कृती छेदने–**
कृणत्ति विकर्तनः।

११. **शिष्लृ विशेषणे**–विशेषणमुपरञ्जनं–
विशिनष्टि गुणेन गुणिनं, विशिण्ढि, व्यशिनट्।

१२. **पिष्लृ संचूर्णने–**
पिनष्टि वेशवारं गृहिणी।

१३. **भञ्जी आमर्दने–**
भनक्ति भङ्गुरं काष्ठमनायासेन वर्धकिः।

१४. **भुज पालनाभ्यवहारयोः–**
भुनक्ति पृथिवीं नृपः, भुंक्ते भक्तं बुभुक्षितः, अशने भुजीत्यात्मनेपदम्।

१५-१६. **तृह हिसि हिंसायां–**
तृणेढि परिवृढः परबलं, हिंहि।

१७. **उन्दी क्लेदने–**
उनत्ति तूलिका पतिता पानीये।

१८. **अन्जू व्यक्तिम्रक्षणगतिषु–**
व्यनक्ति अतिरिक्तार्थं काव्यस्य टीकाकारः स्फुटीकरोतीत्यर्थः, अभ्यनक्ति तैलेन गात्रं गृहस्थः, म्रक्षयतीत्यर्थः। अनक्ति अनड्वान्, तृणमत्तुं गच्छतीत्यर्थः।

१९. **तन्चु संकोचने–**
तनक्ति नक्तं कमलम्।

२०. **ओविजी भयचनलयोः–**
विनक्ति विजने जनो दुष्टजन्तुभ्यः।

२१. **वृजी वर्जने–**
वृणक्ति विरक्तो ममताम्।

२२. **पृची सम्पर्के–**
पृणक्ति पोतो जनकस्य पृष्ठे।

परस्मैभाषाः।

२३. **ञिइन्धी दीप्तौ**–ञ्यनुबन्धो वर्तमाने क्तार्थः–
इन्धे वह्निरिन्धनैः।

२४. **खिद दैन्ये**–
खिन्ते दरिद्रः।

२५. **विद विचारे**–
विन्ते विद्वान् वेदार्थं मीमांसया।

आत्मनेभाषाः।

इति दुर्गसिंहोक्तगणवृत्तौ नविकरणा रुधादयः समाप्ताः।

तनादिगणः

१. **तनु विस्तारे–**
तनोति तनुते वा तन्तुन् तन्त्रवायः।

२. **षणु दाने–**
सनोति सनुते वा गां गुरवे गृहस्थः।

३-४. **क्षणु क्षिणु हिंसायाम्–**
क्षणोति क्षणुते क्षिणोति क्षिणुते वा राक्षसः सकलम्।

५. **ऋणु गतौ–**
ऋणोति ऋणुते वा वनं वानप्रस्थः।

६. **तृणु अदने–**
तृणोति तृणुते वा तृणं वृषभः।

७. **घृणु दीप्तौ–**
घृणोति घृणुते वा दापः, घृत्वा घर्णित्वा।

८. **डुकृञ् करणे–**
करोति कुरुते वा कार्यं कृती।

विभाषिताः।

९. **वनु याचने–**
वनुते धनं दानी धार्मिकेषु।

१०. **मनु बाधने–**
मनुते मुनिरात्मानम्।

आत्मनेभाषौ।

इति दुर्गसिंहोक्तगणवृत्ता उविकरणास्तनादयः समाप्ताः।

क्र्यादिगणः

१. **डुक्रीञ् द्रव्यविनिमये–**
क्रीणाति क्रीणीते वा कनकं वणिक्।

२. **प्रीञ् तर्पणे कान्तौ च–**
प्रीणाति प्रीणीते वा पितरं पुत्रः।

३. **श्रीञ् पाके–**
श्रीणाति श्रीणीते वा यवागूम्।

४. **स्कुञ् आप्रवणे–**
आप्रवणमावरणं–स्कुनाति स्कुनीते वा वाटीं वेत्रादिना वास्तव्यजनः।

५-६. **षिञ् युञ् बन्धने–**
सिनाति सिनीते युनाति युनीते वा विषयिणमपराधिनं कारासु राजा, योष्यति।

७. **क्नुञ् शब्दे–**
क्नुनाति क्नुनीते वा कोकिलः। कुञ् इत्येके, तथा च प्रयोगः–क्रौञ्चचक्रं कुनातीति, एतच्च न दुर्गमतमनुगृह्णाति तथा च न कवतेश्चेक्रीयित इत्यत्र स्वविकरणनिर्देशात् कौतिकुवत्योर्माभूदित्येवाभिदधौ, अन्यथा कौतिकुवतिकुनातीनां माभूदित्येव युज्यते।

८-९. **मीञ् द्रूञ् हिंसायाम्–**
मिनाति मीनीते द्रूणाति द्रूणीते वा अबलं सबलः कुराजनि देशे।

१०. **पूञ् पवने–** पुनाति पुनीते वा पन्थानं पवनः।

११. **लूञ् छेदने–**
लुनाति लुनीते वा व्रीहीन् कृषकः।

१२. **स्तृञ् आच्छादने–**
आस्तृणाति आस्तृणीते वा तृणैर्भूमिं प्रावृट्।

१३. **कॄञ् हिंसायाम्–**
कृणाति कृणीते वा कुशलं खलः साधूनाम्।

१४. **वृञ् वरणे–**
वृणाति वृणीते वा पतिंवरा युवानम्। केचिदमुं दीर्घान्तं पठन्ति, तदा वूर्ण इत्यादि।

१५. **धूञ् कम्पने–**
धुनाति धुनीते वा धात्रीपल्लवं वायुः।

१६. **ग्रह उपादाने–**
गृह्णाति गृह्णीते वा वस्तु गृहस्थः सत्तमात्। प्वादिल्वादिषु पाठोऽस्य निष्फलः। केचित् गृह्णः गृह्णवान् गृह्णिरिति छान्दसप्रयोजन इति मन्यन्ते।

विभाषिताः।

१७-१८. **शृ स्वृ हिंसायाम्–**
श्रृणाति स्वृणाति वा सिंहः करिघटां, स्वूर्णः। केचिदवकारमध्यं पठन्ति, तेषां सीर्णः।

१९. **पृ पालनपूरणयोः–**
पृणाति दीनं धन्यमायो धनी, पूर्तः पूर्ण इत्यादि पूरी आप्यायने इत्यस्य।

२०-२१. **व्ली वृ वरणे–**
व्लिनाति वृणाति वा वरं बाला, व्लीनः, वूर्णः औष्ठ्योपधोऽयमिति पुनः पाठः। लवने इति कश्चित्।

२२. **भृ भर्त्सने–**
भृणाति तूणं, भकारादिरयं इत्थमेव बोभूर्यत इति (३.५.४३.)। वृत्त्युदाहरणं पञ्जिकायां भृ भर्त्सन इति धातूत्तोलनं च। एतदविदित्वा ह्व हूर्छने इति हकारादिपाठं मन्यमानेन मिश्रेण

(चतुर्भुजेन) तु अन्यथैव प्रतिपादितम्। तथा च।

२२(क) **हूर्छनं कौटिल्यम्–**
ह्वणाति भ्रुवं कुपितं, जह्वार।

२३. **दृ विदारणे–**
दृणाति दारु दासेरक:।

२४. **जृ वयोहानौ–**
जृणाति जरया नर:।

२५. **नृ नये–**
नृणाति नृपतिरुपाये रिपुजये।

२६. **गृ शब्दे–**
गृणाति गिरं गीष्पतिरिव प्रगल्भ:। प्रत्यनुपूर्वोऽयमुत्साहने–
छात्राय प्रतिगृणाति अनुगृणाति उत्साहयतीत्यर्थ:।

२७. **जी वयोहानौ–**
जिनाति युवतिर्जरसान्वितम्।

२८. **ॠ गतौ–**
समृणाति दशार्णं वर्णी।

२९. **री रेषणे च–**
रेषणमिह हिंसनं, चकारो गतिमनुकर्षति–
रिणाति वनमारण्यक:। आङ्पूर्वोऽयं शोषणे।

३०. **ली श्लेषणे–**
लिनाति ललना लावण्यम्।
कर्माविवक्षायां लिनाति जलधौ सरित्।

३१. **ल्पी च–**
चकार: श्लेषणमनुकर्षति, तर्हि भिन्नयोगो व्यर्थ:, सत्यं चकारमकृत्वा एकयोगे एकधातुप्रतिपत्ति: स्यात्। तालव्यमध्योऽयमिति मतिमोदिनी, पकारमध्योऽयमिति मिश्र:–ल्पिनाति, वकारमध्योऽमित्यपर: ल्विनाति।
वृत्। प्वादिर्द्वाविंशति: प्वादिल्वादिव्यवछित्तये वृदित्यर्थ:।

केचित् तु सन्निहितत्वात् ल्वादिमेव व्यवछिनत्ति प्वादिस्तु आगणं प्राप्तावपि व्रीभ्री-धातू आदायैव निवृत्तिः अन्यत्र प्रयोजनाभावादिति प्रचक्षते।

३२. **व्री वरणे–**

व्रीणाति ऋत्विजं यजमानः।

३३. **भ्री भरणे–**

भ्रीणाति भृत्यं भर्ता। भ्री भये इति केचित्।

३४-३५. **णभ तुभ क्षिष् हिंसायाम्–**

नभ्नाति तुभ्नाति क्षिणाति वा प्रभुरसमञ्जसजन्तून्। क्षिष् हिंसायामिति भिन्नयोगं विचित्रार्थं कश्चित् कुरुते, क्षिया।

३६. **ज्ञा अवबोधने–**

जानाति जगन्ति भगवान्। चकारोयमनुपसर्गे वेति समुच्चिनोति, तेन जानीते जयदेव एवेत्यादयः प्रयोगाः साधुतामध्यासते।

३७. **बन्ध बन्धने–**

बध्नाति कारायामनुचितकारिणं नृपतिः।

३८. **श्रन्थ मोचनप्रतिहर्षणयोः–**

श्रथ्नाति वत्सं गोरक्षः।

३९. **मन्थ विलोडने–**

मथ्नाति माथुरो दधि, गोधुक्।

४०. **ग्रन्थ सन्दर्भे–**

ग्रथ्नाति मालां मालाकारः।

४१. **कुन्थ संक्लेशे–**

कुथ्नाति कुमारी प्रसवे वधूः।

४२. **मृद क्षोदे–**

मृद्नाति मोदकं कदलेन बुभुक्षितो भोक्तुम्।

४३. **मृड सुखने–**

मृड्नाति परिवृढः सुखीभवतीत्यर्थः, मृड्नाति मृडानी मृडमिति सकर्मकोऽपीष्यते।

४४. **गुध रोषे–**
गुध्नाति गोधां प्रति व्याध:।

४५. **कुष निष्कर्षे–**
कुष्णाति कदलीं बाल: त्वचं मोचयतीत्यर्थ:।

४६. **क्षुभ सञ्चलने–**
क्षुभ्नाति नभस्वता सरस्वान्।

४७. **क्लिशू विबाधने–** क्लिश्नाति जगदिह दुर्वृत्त:।

४८. **अश भोजने–** अश्नाति पोतो गुडम्।

४९. **उध्रस उञ्छे–**
उदनुबन्धोऽयं दीर्घशङ्कानिरासाय पूर्वं निर्दिश्यते–ध्रस्नाति तपस्वी सस्यमुद्धृतसस्यकेदारे।

५०. **इष आभीक्ष्ण्ये–**
आभीक्ष्ण्यं पौन:पुन्यं, तच्च यद्यपि पाकादिष्वपि संभवति तथापि सामान्यक्रियावाचिधात्वर्थस्य करणस्यैव इह गृह्यते–इष्णाति वैष्णवो वैष्णवव्रतं पुन: करोतीत्यर्थ:।

५१. **विष विप्रयोगे–** विष्णाति विरक्त: पुत्रकलत्रात्।

५२–५३. **प्रुष प्लुष स्नेहनसेचनपूरणेषु–**
प्रुष्णाति प्लुष्णाति वा वारिवाहो गिरिनदीम्।

५४. **पुष पुष्टौ–** पुष्णाति पुष्या मनोरथं यात्राकृतौ।

५५. **मुष स्तेये–**
स्तेयमिह स्वामिनोऽननुमत्या धनग्रहणं–मुष्णाति दस्यु सर्वस्वं साधूनां प्रान्तरे।

५६. **खव भूतिप्रादुर्भावे–**
अवर्णादूटो वृद्धिरित्यनेन वृद्धि:–खौनाति नीतिमाननुदिनं समृद्धो भवतीत्यर्थ इति मिश्र:। धिनोतीत्यादौ य्वोर्व्यञ्जनेऽय इति वलोपमाचक्षाणस्य पञ्जिकाकारस्य मतं वर्णयन् कश्चित् खनातीत्युदाजहार। अपरश्च कृति व्यञ्जने वलोपं व्याचक्षाण: छ्वो: शूटौ पञ्चमे च इत्यत्रापि छकारेण साहचर्यात्

आक्ष्यामिकभिन्नपञ्जमे वस्य ऊटं मन्यमानः
खव्नातीत्युदाहरति। सामान्येन मतत्रयं लिखितं
तारतम्यविचारेण एतेषु भद्रपक्षः सुमनीषिभिर्ग्राह्यः।
परस्मैभाषाः।

५७. **वृञ् संभक्तौ–**
वृणीते मित्रं सत्पुरुषः धनादिना सम्यग्भजतीत्यर्थः।
आत्मनेभाषः

इति गणवृत्तौ नाविकरणाः क्र्यादयः समाप्ताः।

चुरादिगणः

१. **चुर स्तेये–**
चोरयति चौरः परधनं, चोरयिष्णुः।

२. **चिति स्मृत्याम्–**
चिन्तयति, चिन्तनं–ना, चिन्ता इनो लोपाभावे चिन्तियेत्यपि।

३. **यत्रि संकोचने–**
यन्त्रयति मन्त्रेण विषवैद्यैः काद्रवेयान्।

४. **स्फडि परिहासे–**
स्फण्डयति सखा सखायम्।

५. **लक्ष दर्शनाङ्कयोः–**
लक्षयति वृक्षं पक्षी,पश्यति चिह्नयति वेत्यर्थः।
विभाषितोऽयमित्येके इति दुर्गः।
तन्मते लक्षयते इत्यपि।

६. **भक्ष अदने–**
भक्षयति पक्षी लक्षितमामिषम्।

६क. **कुद्रि अनृतभाषणे–**
कुन्द्रयति यन्त्रणया कूटसाक्षी, मिथ्या वदतीत्यर्थः।
डान्तोऽयं ऋदनुबन्ध इति मतिमोदिनी, तन्मते कोडयति
कुड्या कुल्या इति।

७. **लड उपसेवायाम्–**
लाडयति लालयति वा बाला बालपाशं, मानुबन्धोऽपि
जिह्वासेचने–लडयति जिह्वामहिः।

८–१०. **मिद तिल ष्णिह स्नेहने–**
मेदयति तेलयति स्नेहयति तैलेन वर्तिकां प्रदीपकारकः।

मिदिरिदनुबन्ध इति केचित्, तन्मते मिन्दयति।

११. **ओलडि उत्क्षेपे–**

लण्डयति पिण्डं श्वानं प्रति शिशुः, लण्डिनः

इड्व्यवधानेऽपि निष्ठातो नत्वं ओदनुबन्धबलात्।

केचिदोकारादिमेवामुं मन्यन्ते, तन्मते ओलण्डयति ओलण्डितः।

१२. **जल अपवारणे–**

जालयति भित्तिमन्तगृहदर्शनाय, सविबन्धां करोतीत्यर्थः।

१३. **पीड अवगाहने–**

पीडयति निविडस्तनमुरो रागी, दुःखक्रियायामप्ययं–पीडयति पान्थं विरहः, पीडा।

१४. **नट अवस्यन्दने–**

नाटयति शोणितमवटोः, उन्नाटयति चौरस्येति हिंसार्थोऽपि।

१५. **श्रथ प्रतिहर्षे–**

श्राथयति श्रवणेन जन्मनः पुत्रस्य पुत्री, पुनः पुनः हृष्यतीत्यर्थः। प्रतिरोधो हर्षस्येति केचित्। तदा श्राथयति श्रवणेन विपदः पुत्रस्य पुत्री।

१६. **वध संयमने–**

संयमनं बन्धनं–बाधयति बन्धनालयेऽपराधिनं अधिपः।

१७. **पृ पूरणे–**

पारयति वराकं कृपालुः, शक्तौ च पारयति पराकं कर्तुं तपस्वी।

केचिदमुं दीर्घान्तं पठित्वा पुपूर्षतीति मन्यन्ते, तदिह धात्वन्तरेण सिध्यति, ह्रस्वान्त एवायमिति पिपारयिषति, पारय इत्यादि।

१८. **ऊर्ज बलप्राणधारणे–**

बलप्राणयोर्धारणं–ऊर्जयति समर्जितवित्तः दुःखेन जीवलोके।

१९-२१. **चुट छुट कुट्ट छेदने–**

चोटयति छोटयति कुट्टयति वा दुष्टाधिष्ठितमरणं

नराधिपः, छोटिका कुट्टाकः, कुत्सनेऽप्ययमित्येके।

२२-२३. **पुट्ट चुट्ट अल्पीभावे–**

पुट्टयति चुट्टयति वा निदाघस्य वासरे सरसी।

२४. **मुट संचूर्णने–**

मोटयति मल्लं बलवान् भटः।

२५-२७. **स्मिट अट्ट षुट्ट अनादरे–**

स्मेटयति अट्टयति सुट्टयति वा वटुं वयसाधिकः।

२८. **घट्ट चलने–**

घट्टयति घनः समीरणौघेन।

२९-३०. **छद खट्ट संवरणे–**

छादयति खट्टयति वा खट्वां प्रच्छदपटेन, प्रच्छदः, छदिः, छद्म, छत्रमित्यादि, खट्टना।

३१-३२. **शठ श्वठ संस्कारगत्योः–**

शाठयति श्वाठयति वा भूमिमुद्युक्तः, शुठि इत्येके, शुण्ठयति।

३३-३६. **षट्ट तुजि पिजि पिष हिंसाबलदाननिकेतनेषु–**

सट्टयति तुञ्जयति पिञ्जयति पेषयति वा समितौ शत्रून् सुभटः। पिसिरयं दन्त्यान्त इति केचित् पेसयति, पटादिदण्डकेऽपि तुञ्जिपिञ्जी पठिष्येते आत्मनेपदार्थं तुञ्जयते पिञ्जयते इत्यादि, अनयोः पुनः परस्मैपदमेव स्यादिति, अन्ये तु अर्थभेदेन द्विःपाठमाहुः।

३७-३८. **श्वल्क वल्क भाषणे–**

श्वल्कयति वल्कयति वा बहु वाचाटः।

३९-४१ **श्वर्त (स्वत, राम) छुपि पथि गतौ–**

श्वर्तयति, अयं कृच्छ्रजीवने इत्येके,श्वभ्र इत्येके, छुम्पयति पन्थयति वा पान्थः पन्थानम्।

४२. **क्षपि क्षान्तौ–** क्षम्पयति दीनमनुकम्पकः।

४३. **पिच्च कुट्टने–**

पिच्चयति पिचुमर्दं वर्धकिः।

४४. **तड आघाते–**
ताडयति पोतं कुपितः पिता।

४५-४९. **खड खडि कडि भेदे–**
खाडयति खण्डयति कण्डयति।

५०-५२. **नक्क धक्क पशि नाशने–**
नक्कयति धक्कयति पंशयति वा पांशुवृष्टिः। पसिरयं दन्तमध्य इति कश्चित्, पांसुशब्दोऽपि दन्त्यमध्य इति तन्मतम्।

५३-५४. **चक्क चुक्क व्यथने–**
चक्कयति चुक्कयति वा करिकरमङ्कुशेन हस्तिपकः।

५५. **पुस्त आदरानादरयोः–**
पुस्तयति कस्तूरिकां काचित्, पुस्तः पुस्तकम्।

५६. **क्षल शौचे–**
शौचमिह शुचीकरणं–प्रक्षालयति पात्रं परिवेशकः, क्षालः।

५७. **तल प्रतिष्ठायाम्–**
तालयति व्रतं सुकृतिनः सम्पूर्णं भवतीत्यर्थः, सम्पूर्णीकरणेऽपि प्रयोगवशात्। घुषिरविशब्दन इति प्रतिषेधाात् विकल्पे नन्ताश्चुरादयः। अपरे तु विशब्दनप्रतिषेधात् चुरादिभ्यो यथाभिधानं इन्प्रत्ययः न विकल्पः सार्वत्रिक इत्याहुः, तालः तलमित्यपि भवति।

५८. **तुल उन्माने–**
तोलयति मानं कामिनां कामः, तोला, तुला, तुलितः, इत्यादि विकल्पितेन्पक्षे।

५९. **दुल उत्क्षेपे–**
दोलयति दोलां दोलावाहकः, दोला, दुलिः।

६०. **पृथ प्रक्षेपणे–**
पर्थयति पृथिवीमबादिभ्यः, भेदेन जानातीत्यर्थः, पर्थयति पायसे घृतं प्रक्षिपतीत्यर्थः। तस्मात् प्रक्षेपणमिह मिश्रणं अमिश्रणं च। अत्रैव प्रथ प्रख्याने इति कश्चित् प्राथयतीत्यादि।

अदन्तप्रकरणे तु दृश्यते प्रयोगात्।

६१. **शम्ब सम्बन्धे–**

शम्बयति शम्बलं शम्बूकं पाथेयोचितम्। अत:परं षम्ब च इति केचित् पठन्ति, सम्बयति।

६२. **चुल निमज्जने–**

चोलयति चीवरं जलमध्ये, बुल इति कश्चित्।

६३. **ष्टूप समुच्छ्राये–**

स्तूपयति सूपकार ओदनं पक्त्वा।

६४. **मूल रोहणे–**

मूलयति तरुं, रोपयतीत्यर्थ:, मूलं, मूलिका।

६५. **क्षजि कृच्छ्रजीवने–**

क्षञ्जयति क्षञ्ज: कष्टं जीवतीत्यर्थ:,।

६६. **सान्त्व सामप्रयोगे–**

सान्त्वयति शोकाकुलं सामवादै:,ꞌषोपदेशोऽयमिति केचित्।

६७. **मान पूजायाम्–**

मानयति मान्यमभ्युत्थानादिभिर्विद्वान्।

६८. **चुद सञ्चोदने**–सञ्चोदनमाक्षेप:–

चोदयति चिन्तितमन्यैरन्य:, आक्षिपति खण्डयतीत्यर्थ:।

६९–७२. **कल पिल डिप क्षेपे–**

कालयति कालं कौलिकाचारै: कुलवधू: गमयतीत्यर्थ:, एवं पेलयति डेपयति। डिल इति कश्चित् डेलयति।

७३–७५. **कुडि जसि पल रक्षणे–**

कुण्डयति जंसयति पालयति वा पृथ्वीं पृथिवीपति:।

७६. **श्लिष श्लेषणे–**

श्लेषयति विशिष्टं घटक:।

७७–७९. **लूष व्रूष वर्ह हिंसायाम्–**

लूषयति व्रूषयति निवर्हयति वराहम्।

८०. **शुन्ध सर्जने–**

शुन्धयति बन्धुं शुद्धाशय:, सृजतीत्यर्थ:।

८१. **ज्ञप मानुबन्धश्च–**
ज्ञपयति ज्ञापने चायमभिधीयते। मारणादिष्वर्थेषु तत्र घटादित्वेनापि सिद्धे कर्त्रभिप्राये क्रियाफले परस्मैपदमिति, पुनर्मारणादिषु मानुबन्धत्वमितीष्यत इति कश्चित् किल हेत्विनन्तात् कर्त्रभिप्राये आत्मनेपदमेव स्यात्। तदयुक्तमिह तस्यानादरात् तत्र हि मारणाद्यर्थे परस्मैपदमेव तत्र हेतावात्मनेपदमपीति प्रयोजनम्।

८२. **यम च परिवेशने–**
चकारेण मानुबन्धत्वमपेक्षितमस्योत्तरस्य धातो:– यमयति तेमनमनतिक्रमेण भोजने जननी, परिवेशयतीत्यर्थ:। ननु घटादौ यमोऽपरिवेशने मानुबन्धत्वमुक्तं, तत्कथं न विरोध:। सत्यं स्वार्थेऽत्र मानुबन्धत्वं यत्र हेताविति न दोष:। केचित् घटादौ परिवेशन एव मानुबन्धत्वमाहु:। मन्यते प्रयोजनमिह कर्त्रभिप्रायेण परस्मैपदमपि दर्शितम्।

८३. **चप कल्कने**–कल्कनमिह चूर्णीकरणम्–
चपयति पाषाणपट्टे तण्डुलान् सूपकार:।

८४. **न हेतावन्ये मानुबन्धा:–**
ज्ञपादिभ्योऽन्ये धातव: अहेतौ स्वार्थे इनन्ते घटादिपठिता अपि न मानुबन्धा: तेन स्यामयते शामयत इत्यादिकमु-दाहरिष्यते।

८५. **ध्यप क्षेपे–**
ध्यापयति धूलिमनिल:, अदिध्यपत्।

८६-८७. **स्फिट वुधि हिंसायाम्–**
स्फेटयति वुन्धयति वा निर्बन्धतो रिपुनेता। वुधीति अन्तस्थादिरयं टवर्गद्वितीयान्तोऽन्यै: पठ्यते वुण्ठयति।

८८-९०. **पूल मुस्त पिडि सङ्घाते–**
पूलयति मुस्तयति पिण्डयति वा तण्डुलान् पिण्डद:।

९१. **पुंस अभिमर्दने–**
पुंसयति कंसे कासमर्दम्। डपि डिपीत्येके– डम्पयति

डिम्पयति।

९२. **टकि बन्धने–**

टङ्कयति चटकं विटङ्कोपरि पाशिकः, टङ्कः, टङ्ककः।

९३. **धूस कान्तीकरणे–**

धूसयति धनिकाङ्गं मलयजरजः, धूस्तूरः तालव्यान्तोऽयमिति कश्चित्।

९४. **कीट बन्धे–**

कीटयति कापटिकः स्वकृतमनुतापं, कीटः।

९५. **चूण सङ्कोचने–**

चूणयति दुश्चरितेन संभावितः, सङ्कुचितो भवतीत्यर्थः।

९६. **तूण पूरणे–**

तूणयति तूणं शरैर्वीरः। दूर इति केचित्, धातुरेवायं नास्तीति केचित्।

९७. **पूज पूजायाम्–**

पूजयति विजयां विजयकामः।

९८-९९. **अर्क ईड स्तवने–**

अर्कयति ईडयति वा मृडानीं चाण्डः।

१००. **शुठ आलस्ये–**

शोठयति मठे कठः, अलसो भवतीत्यर्थः।

१०१. **शुठि शोषणे–**

शुण्ठयति कण्ठं कठिनतरातपागमः, शुण्ठा, शुण्ठी।

१०२-१०३. **जुड चूर्ण प्रेरणे–**

जोडयति जोलयति वा जलं प्रणाली।

चूर्णयति चूर्णेन तैलं पत्रस्य लेखकः, बूर्ण इत्यपरे।

१०४-१०५. **गर्ज मार्ज शब्दार्थौ–**

गर्जयति मार्जयति वा मृदङ्गं मार्दङ्गिकः, गुज इत्येके, गोजयति।

१०६. **पचि विस्तारवचने–**

प्रपञ्चयति पञ्जिका वृत्त्यर्थम्। प्रपञ्चना, पंक्तिरिति इनो

विकल्पात्, धात्वन्तरेणेति त्रिलोचनः, पञ्जिकेति वर्णविकारात्।

१०७. **तिज निशाने–**

तेजयति राजकरवालं कर्मकारः।

१०८. **कृत संशब्दने–**

कीर्तयति कीर्तिं कविर्नृपस्य, कृत इति ह्रस्वमध्य इति कश्चित्।

१०९. **वर्ध छेदनपूरणयोः–**

वर्धयति दूराधर्षं रिपुं रणभूमौ वीरः, वर्धयति गर्धनं घनेन दाता।

११०. **कुबि छादने–**

कुम्बयति तुमुलेन संग्राममभूमिं प्रबली।

१११-११२. **लुबि तुबि अर्दने–**

लुम्बयति तुम्बयति वा धैरिणं विजिगीषुः, तुम्बा।

तुपीत्येके–तुम्पयति, तुम्पा।

११३. **ह्लप व्यक्तायां वाचि–**

ह्लापयति होता हविराधानमन्त्रम्। ह्रप इति कश्चित्, ह्रापयति।

११४. **म्लेछ च**–पूर्वार्थाकर्षणाय चकारः भिन्नयोगो विचित्रार्थः–

म्लेच्छयति म्लेच्छः कुत्सितपदम्।

११५. **चुटि छेदने–**

चुण्टयति चेटिका केशान् परार्थं साधुः।

११६. **म्रक्ष म्रक्षणे**–म्रक्षणं कठिनस्य द्रवेण संयोजनं–

म्रक्षयति भक्षितुं भक्तममृतेन दीनः।

११७. **इल प्रेरणे–**

एलयति बलात् मल्लान्तरं मल्लः।

११८. **लुण्ट स्तेये–**

लुण्टयति लुण्टाकः कान्तारे परसर्वस्वम्। द्वितीयान्तोऽयमिति कश्चित्, लुण्ठयति।

११९. **छर्द वमने–**

वमनं उद्गरणं–छर्दयति अर्दितो रोगेण भुक्तमन्नम्।

१२०. **सूर्प माने–**
सूर्पयति सूर्पेण धान्यं विक्रेता, मातीत्यर्थः।

१२१. **गुडि वेष्टने–**
गुण्डयति मण्डलं गुण्डिकाभिर्व्रती। चूर्णीकरणेऽप्येवं वर्तते शिष्टप्रयोगात्।

१२२. **बल भृतौ–**
भृतिरिह पोषणं–बालयति बालं जननी।

१२३. **गर्ध अभिकाङ्क्षायाम्–**
गर्धयति वार्धकेऽपि लुब्धो धनम्।

१२४. **पूर्व निकेतने–**
निकेतनमिह निमन्त्रणं निवासो वा–पूर्वयति सर्वान् भोक्तुं दानपतिः, पूर्वयति सर्व इह निर्वृतिवाञ्छया।

१२५. **रुष रोषे–**
रोषयति रिपवे राजा।

१२६. **मडि भूषायां हर्षे च–**
मण्डयति मण्डनेन कपोलं कलावती।

१२७. **श्रण दाने–**
विश्राणयति धनमर्थिने धार्मिकः। हेतौ घटादिरयं, विपूर्व एवास्य प्रयोगः प्रायेण।

१२८. **भडि कल्याणे–**
अयं प्रतारणेऽर्थे भाषायां रूढः कल्याणभावना तु छन्दोऽनुरुध्य उक्ता, भण्डयति प्रतारको लुब्धं धनदानाङ्गीकारेण।
मडिधातोः परतोऽस्य पाठो न्याय्यः।
मडिप्रभृतीनां गणान्तरपठितानां चाप्यविशेषरूपाणामेकार्थानां घञन्तत्वेन नामधातूनां रूपसिद्धाविहोपदेश उभयपदप्रतिषेध परः प्रतिज्ञायते।

१२९. **वज मार्गणसंस्कारे–**
मार्गणं (णः?) बाणः, तस्य संस्कारः पक्षादिना, तत्र

वाजयति बाणान् पक्षैः काण्डकारः। गतावपि केचित्।

१३०. **ब्युष उत्सर्गे–**

व्योषयति वासं सन्न्यासी, प्युष इति त्रिलोचनः।

१३१. **जसु हिंसायाम्–**

चौरस्योज्जासयति, जस इति कश्चित्।

परस्मैभाषाः। एते चुरप्रभृतयो परस्मैपदिनः

नत्विनन्तत्वादुभयपदिन इत्यर्थः।

१३२. **तत्रि कुटुम्बधारणे–**

कुटुम्बपोषणमर्थो न प्रायिकः, विस्तारणेऽस्य बहुप्रयोगः–

तन्त्रयते तन्तून् तन्तुवायः।

१३३. **मत्रि गुप्तभाषणे–**

मन्त्रयते मन्त्रिभिः कर्तव्यमर्थं नायकः।

१३४-१३५. **वस्त गन्ध अर्दने–**

अर्दनमिह गतिहिंसायाचनार्थकमेव यथाप्रयोगमुदाहरणम्।

वस्तयते गन्धयते वा सिन्धुः सिद्धम्।

१३६. **हिक्क हिंसायाम्–**

हिक्कयते वृकः पथिकजनं, हिष्क इत्येके, हिस्क इत्यपरे।

१३७. **णिष्क परिमाणे–**

निष्कयते सुवर्णं वणिक्, प्राणिनिष्कत्।

१३८. **लल ईप्सायाम्–**

लालयते ललनां लावण्यवतीं युवा।

१३९. **चित संवेदने–**

चेतयते चिन्तितमर्थमचपलः।

१४०. **दशि दंशने–**

दंशयते दन्दशूकः पथि रात्रौ पथिकम्।

१४१. **दसि दर्शने च**–चकारात् दंशने च–

दंसयते वंशाग्रे नृत्यन्तं नटं दानपतिः।

१४२. **हूण (कूण?) संकोचने–**

हूणयते हूणः कराघातेन, सङ्कुचितो भवतीत्यर्थः, अजुहूणत्

१४३-१४४. **डप डिप संघाते–**
डापयते डेपयते वा नावं नाविकः। डपि डिपीत्येके डम्पयते इत्यादि।

१४५. **तूण पूरणे–**
तूणयते तूणीरं बाणेन धानुष्कः।

१४६. **स्पश गर्हणश्लेषणयोः–**
स्पाशयते। भाषायां प्रयोगोऽस्य दृश्यत इति कश्चित्। त्रिलोचनदासमते पुनर्नास्त्येवेति लक्ष्यते यतस्तस्यैव धातुवृत्तौ अयं कैश्चित् पठ्यत इत्युक्तम्।

१४७. **तर्ज भर्त्स सन्तर्जने–**
तर्जयते भर्त्सयते वा जनमनाचारस्थं राजा, तर्जना, भर्त्सना।

१४८. **भ्रूण आशायाम्–**
भ्रूणयते भद्रं भव्यः।

१४९. **यक्ष पूजायाम्–**
यक्षयते यक्षराजं धनतृष्णक्।

१५०. **शठ श्लाघायाम्–**
शाठयते शठ आत्मानम्।

१५१. **स्यम वितर्के–**
न्यासकारस्तु श्यालशब्दस्य व्युत्पत्तये श्याल वितर्के इति मन्यते–स्यामयते दूरे पथि महिषं गोत्वेन।

१५२. **गूर उद्यमे–**
उद्गूरयते मुद्गरं चौरो हन्तुम्। गूर भक्षणे इति केचित्, गुरी उद्यमे इति केचित्।

१५३-१५४. **शम लक्ष आलोचने–**
शामयते लक्षयते वा सर्वप्रयोजनममात्यप्रधानम्।

१५५. **कुत्स अवक्षेपणे–** अवक्षेपणमिह निन्दा–कुत्सयते मत्सरतां स्वच्छमतिः, कुत्सः, कुत्सा।

१५६. **भल आभण्डने–**
भालयते इङ्गितेन भामिनी अभव्यम्। निपूर्वोऽयं निरूपणे।

१५७. **कूट अप्रसादे–**
कूटयते कापटिकः स्फुटमप्यर्थम्। कुट प्रतापन इति कश्चित्, कोटयते।

१५८. **वञ्चु प्रलम्भने**–वञ्चयते कञ्चिदर्थिनं कृपणः।

१५९. **धृषु शक्तिबन्धने–**
धर्षयते धार्मिकं दुष्टः, वृषु इति कश्चित्।

१६०. **मद तृप्तियोगे–**
मादयते मदिरया मत्तः।

१६१. **दिवु परिकूजने–**
देवयते गर्भदुःखिता।
वञ्चुप्रभृतेरुदनुबन्धत्वम् स एव धातुरर्थान्तरे चुरादिरिति ज्ञापनार्थम् इदं नातिप्रयोजनमिति
नानुबन्धमुदाहरन्ति वृद्धाः, तदसाधु समधिगच्छामः।

१६२. **गृ विज्ञाने–**
गारयते गुरुतः सूक्ष्ममर्थमभियोगी।

१६३. **विद वेदनाख्याननिवासेषु–**
वेदयते विद्धः व्यथत इत्यर्थः, निवेदयते स्वार्थं आख्यातीत्यर्थः, वेदयते तीर्थे वसतीत्यर्थः।

१६४. **मन स्तम्भे–**
मानयते मन्त्रादिना शत्रुं स्तभ्नातीत्यर्थः।

१६५. **यु जुगुप्सायाम्–**
यावयते युवती जरन्तम्।

१६६. **कुस्म कुस्मयने–**
कुत्सितं स्मयनं कुस्मयनं–कुस्मयते विस्मयपराऽप्यविदग्धा।
आत्मनेभाषाः। एते तत्रिप्रभृतयः कुस्मान्ता आत्मनेपदिन इत्यर्थः। आगर्वादात्मनेपदीत्यतोऽनन्तरं चर्चादयः स्तेनान्ता अपि जसु हिंसायामित्यतः पूर्वगणे पठितुं युज्यन्ते।
तद्विचारतयैवाप्रेक्षापूर्वकारिणां पुनरुभयपदवेदिनां परस्मैपदविभागाय द्विधोपदेश एव साधीयानिति।

१६७. **चर्च अध्ययने–**
चर्च्चयति निश्चितमतिर्वेदान्, चर्क इति कश्चित्।

१६८. **बुक्क भाषणे–**
बुक्कयति वाचालो बहूनि वचांसि।

१६९. **शब्द उपसर्गादाविष्कारे च–**
शब्द इत्ययं धातुरुपसर्गात् पर आविष्कारे भाषणे च चुरादिरित्यर्थः। प्रशब्दयति गभीरमर्थं स्फुटीकरोति भाषते वेत्यर्थः। अन्यत्र शब्दायति शब्दयति वा शाङ्खिकः। भाषणाविष्काराभ्यामन्यत्र सोपसर्गस्य प्रयोगवारणार्थमिदम्। यद्येवं क्रुधिमण्डीत्यादिसूत्रे शब्द इति लिङ्गमिनन्तं चौरादिकमित्येक इति कथमुक्तं वृत्तिकृता। सत्यं एवं योजनीयं लिङ्गमिनन्तं, तत्र शब्दन इति न पुनश्चौरादिकपक्षेऽपि शब्दन इति।

१७०. **कण निमीलने–**
काणयति अक्षिकाणः।

१७१. **जभि नाशने–**
जम्भयति स्मरं शम्भुः।

१७२. **षूद आस्रवणे–**
सूदयति मदिरा शौण्डिकभाण्डात्। क्षणने इत्येके।

१७३. **जस ताडने–**
जासयति शिशुमध्येतुं पिता। हिंसायां पठितोऽपि पुनरर्थभेदात् पठ्यते।

१७४. **पश बन्धने–**
पाशयति पशुं पशुपालः।

१७५-१७६. **चट स्फुट भेदे–**
उच्चाटयति नवोढां पत्युः सपत्नी, आस्फोटयति भटमुत्कटो मातङ्गः। इनो विभाषामङ्गीकृत्य चटति स्फुटतीत्याद्यपि।

१७७. **घट सङ्घाते–**
घाटयति कवाटं द्वारि दौवारिकः। अनेनैव सिद्धे कथं

उच्चाटितकवाट इति (३.४.६५) वृत्तिकृता सिद्धान्तान्तरमुक्तं, नन्वसिद्धेः।

१७८. **हन्त्यर्थाश्च–**

येऽपि हन्त्यर्था यत्र कुत्र पठ्यन्ते तेऽपि चुरादौ पठितव्याः। अत्रैव घातयति हिंसयति तर्दयति। अन्ये त्वेवं व्याचक्षते– चटप्रभृतयो हन्त्यर्था अपि चुरादय इत्यर्थः। ते अजीघतदित्यादि स्वार्थेनं मन्यन्ते। अनेनैव सिद्धे अन्येषां तु हिंसार्थानां चुरादौ पाठ आत्मनेपदादिह रूपभेदार्थः।

१७९. **दिवु अर्दने–**

देवयति दरिद्रः, परं गच्छति याचते वेत्यर्थः।

१८०. **अर्ज प्रतियत्ने–**

अर्जयति परिजनो जलं (धनं, रमा.)।

१८१. **घुषिर् विशब्दने–**

विशब्दनमिह भाषणं आविष्करणं विविधशब्दनं वा–घोषयति गूढमर्थमभियुक्तः। क्षुभिवाहीत्यत्र विशब्दनप्रतिषेधात् चुरादाविन् विभाषया भवति इति ज्ञाप्यते,तेन जुघुषुः पुष्पमाणवा इति।

१८२. **आङः क्रन्द सातत्ये–**

आङ्पूर्वः क्रन्दधातुः सातत्ये चुरादिरित्यर्थः, आक्रन्दयति। अन्ये तु क्रन्दसातत्ये इत्यर्थनिर्देशः घुषिरनुवर्तते, तेन आघोषयतीत्यादि।

१८३. **लस शिल्पयोगे–**

लासयति कुशलो लास्ये।

१८४-१८५. **तसि भूष अलङ्कारे–**

तंसयति भूषयति वा यौवनमङ्गनाम्।

१८६. **मोक्ष असने–**

मोक्षयति लक्ष्मीवान् आत्मदुःखं क्षिपतीत्यर्थः।

१८७. **अर्ह पूजायाम्–**

अर्हयति हर्षेणातिथिमातिथेयः।

१८८. **ज्ञा नियोजने–**

आज्ञापयति भृत्यान् स्वामी।

१८९. **शृधु प्रहसने–**

शर्धयते वृद्धं कुत्सितशब्देन शिशुः, हसतीत्यर्थः।

१९०. **भज विश्राणने–**

भाजयति भोगं भृत्याय भूपतिः।

१९१. **यत निकारोपस्कारयोः–**

यातयति तनयमध्येतुं ताडयतीत्यर्थः,
यातयति तामसे लताम् उपस्करोतीत्यर्थः।

१९२. **निसश्च प्रतिदाने–**

प्रतिदानं विनिमयः परीवर्त इति यावत्–माषान् निर्यातयति तिलान् दत्त्वा, अथवा तिलमाषयोर्निर्यातयति अत्रापि परिवर्तयतीत्यर्थः। निर इति पाठान्तरम्।

१९३. **वस स्नेहनच्छेदनावहननेषु–**

वासयति तिलान् इति स्नेहने,
वासयति वृक्षान् इति छेदने,
वासयति रिपून् इत्यवहनने।

१९४. **चर असंशये–**

विचारयति विद्वान् आत्मानम्। धातुपारायणिकस्तु चर संशये इति पठति, विचारणा हि संशये भवतीति मन्यते।

१९५. **च्यु हसने–**

च्यावयति व्रीडारहितं सर्वः, हसतीत्यर्थः।
सहने इति कश्चित्–च्यावयति शरान् सहत इत्यर्थः ।

१९६–१९७. **भू कृप अवकल्कने–**

भावयति कल्पयति वा भृत्यस्य वृत्तिं स्वामी। अवकल्कनमिह दानम्। केचित् भूकृप इति पञ्चमीं मन्यन्ते।

१९८–१९९. **रक लक आस्वादने–**

राकयति लाकयति वा लड्डुकं बालः, राकयतिना लत्वे

लाकयतीत्यादि शक्यसाधनमपि कपिरिकादेः प्रपञ्चार्थमेव लकेरुपादानम्। रग लग इति केचित्।

२००. **अञ्चु विशेषणे–**

अञ्चयति प्रपञ्चना प्रपञ्चं विशेषयतीत्यर्थः। पूर्वक एवायं अर्थान्तरे चुरादिरिति बाधाय उदनुबन्धता, तेन सत्यपि धातोरनेकार्थत्वे स्वार्थेनन्तता अन्यत्र नास्ति।

२०१. **लिगि चित्रीकरणे–**

लिङ्गयति अङ्गं रङ्गभूमौ नटः, चित्रीकरोतीत्यर्थः।

२०२. **मुद संसर्गे–**

मोदयति सक्तून् सर्पिषा।

२०३. **त्रस वारणे–**

त्रासयति पशून् सस्यक्षेत्रात्।

२०४. **उध्रस उञ्छे–**

ध्रासयति धान्यमुद्धृतं सस्यकेदारे तापसः। पूर्वक एवायं धातुश्चुरादिरिति प्रतिपत्तये उदनुबन्धत्वम्। कैश्चिदसौ न पठ्यते।

२०५. **मुच प्रमोचने–**

मोचयति मुद्रां वणिक्।

२०६. **आ स्वदः सकर्मकात्–**

स्वद आस्वादने इति वक्ष्यते, तेनैव सिद्धे नियमार्थमिदम्। अस्माद् धातोः सकर्मकक्रियावचनादेव इन् भवति अकर्मकक्रियावचनात् न भवति शाकटायनस्तु आङ्पूर्वात् स्वृ (स्वद?) धातोः सकर्मकक्रियावचनादिन् भवतीति व्याख्याति–

आस्वादयति यवागूं योषित्।

२०७. **ग्रस ग्रहणे–**

ग्रासयति लगुडमग्रेसरः, ग्रसने इत्येके।

२०८. **पुष धारणे–**

पोषयति पाषण्डः कुण्डलं शङ्खस्य।

२०९. **दल विदारणे–**

दालयति दारु वर्धकिः।

२१०-२४०. **पट पुट लुट तुजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दसि दशि क्रुशि (कुशि, रमा) घट घटि बृहि वल्ह वर्ह गुपू धूप बिछ चीव पुथि लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः–**

पाटयति पटुः स्पष्टं भाषत इत्यर्थः, पोटयति, लोटयति, तुञ्जयति, पिञ्जयति, लुञ्जयति। अयमन्यैर्न मन्यते, भञ्जयति, लङ्घयति, त्रंसयति, पिंसयति, कुंसयति क्नसीत्येके क्नंसयति, दंसयति, दंशयति, क्रुंशयति। अयमन्यैर्न पठ्यते–घाटयति सकर्मकार्थकविशेषार्थं च पुनरिह पठनं, केचिन् न पठन्त्येव। घण्टयति घण्टा, बृंहयति बृंहा, वल्हयति, वर्हयति, गोपयति, धूपयति, विच्छयति, चीवयति चीभयति इति केचित्, पोथयति, लोकयति, लोचयति, नादयति, कोपयति, तर्कयति, वर्तयति, वर्धयति। केचिदिहेमं न पठन्ति अन्यैश्च गणान्तरेषु पठितत्वात्। अत्र दण्डके पाठात् धातव एवार्थान्तरेषु प्रत्युदाह्रियन्ते–दंशति दंसति कुंसति तर्कतीत्यादि।

२४१. **पूरी (पूर, रमा) आप्यायने–**

पूरयति प्रावृट् पयोभिर्नदीः।

२४२. **रुज हिंसायाम्–**

रोजयति निजम् ओजसा दुर्वृत्तः, अयमन्यैर्न पठ्यते।

२४३. **स्वद आस्वादने–**

स्वादयति द्राक्षामतीक्ष्णः, अन्यस्तु संवरणे पठति। अतोऽदन्ताः। कथादयोऽघपर्यन्ता धातवोऽकारान्ता अतो नोपधाया दीर्घः स्थानिवत्त्वात् न पुन दीर्घविधिं प्रति तत्त्वाभावे ह्रस्वाभावः प्रयोजनं ऋदनुबन्धकरणात्।

२४४. **कथ वाक्यप्रबन्धे–**

कथयति कथां पौराणिकः, अचकथत्।

२४५. **वर ईप्सायाम्–**
वरयति वरं स्वयंवरा आत्मानुरूपम्।

२४६. **गण संख्याने–**
गणयति गुणिनमग्रे विज्ञः।

२४७. **शठ श्वठ सम्यग्भाषणे–**
शठयति श्वठयति वा वावदूकः सम्यग्भाष इत्येके।

२४८–२४९. **पट वट ग्रन्थे–**
पटयति वटयति वा वटुर्मालाम्।

२५०. **रह त्यागे–**
रहयति विरहे स्नेहो रागिणमपि।

२५१–२५२. **स्तन गद देवशब्दे**–देवशब्दो मेघध्वनिरिति सुभूतिः–
स्तनयति गदयति वा जीमूतः प्रावृषि।

२५३. **पत गतौ–**
पतयति पतयालुः पक्षी नभः।
चुरादेरिन् विभाषा यथाभिधानमित्युक्तमेव, पतति, अपतीत्।
अन्यस्तु विकल्पार्थं वा शब्दमभिदधाति।

२५४. **पष अनुपसर्गात्–**
पषयति पार्श्वं यूनो युवतिः, पषु? इत्येके।

२५५. **सुर आक्षेपे–**
स्वरदन्त्यपरा इत्यत्र एकस्वरवर्जनात् अनेकस्वरसुरधातोर्न षोपदेशत्वं–सुरयति असुरान् संग्रामे।

२५६. **रच प्रतियत्ने–**
रचयति रुचिरं वचो वाग्मी, रचना।

२५७. **कल गतौ संख्याने च–**
चकारो गत्यापेक्षया–कलयति कमलानि मधुपावली।

२५८. **चह परिकल्कने–**
परिकल्कनं चूर्णनं–चहयति हयः खुरक्षेपेण लोष्टकं, चहः।
चह आलोचने लौकिक एव–चहयति जनः कश्चित्।

२५९. **मह पूजायाम्–**

महयति महात्मा महादेवम्।

२६०-२६२. **शार कूप श्रथ दौर्बल्ये–**

शारयति कूपयति श्रथयति वा भावं वृद्धेषु युवतिः। कण कृप श्रथ दौर्बल्ये इति केचित्, कृपणः।

२६३. **स्पृह ईप्सायाम्–**

स्पृहयति पुष्पेभ्यः कामिनी।

२६४. **भाम क्रोधे–** भामयति भूपतिर्भृत्याय।

२६५. **सूच पैशुन्ये–**

सूचयति रुचिः आरोग्यम्। मनोज्ञापनं पैशुन्यम्। पैशुन्यमन्तर्द्रोह इति केचित्–सूचयति सज्जनमसाधुः, अन्तर्द्रुह्यतीत्यर्थः।

२६६. **खेट भक्षणे–**

खेटयति खे कीटं खोरः, खेटना, डान्त इत्येके।

२६७. **खोट क्षेपे–**

खोटयति खलमखिलो लोकः, शोट इत्येके।

२६८. **गोम उपलेपने–**

गोमयति गोमयेन प्राङ्गणं गृहिणी।

२६९. **कुमार क्रीडायाम्–**

कुमारयति कुमारः, कुषू (सू, रमा) ल क्रीडायामिति केचित्।

२७०. **शील उपधारणे–**

शीलयति नीलनिचोलमभिसारिका।

२७१. **साम सान्त्वने–**

सान्त्वनं प्रियकरणं–सामयति सम्यग्दानेन परमतिबलिनं नृपतिः।

२७२. **वेल कालोपदेशे–**

वेलयति कालमियत्तया एतावती वेला इति कथयतीत्यर्थः। काल इत्यपि धातुरपरेण निगद्यते-कालयति।

२७३. **पल्यूल लवनपावनयोः–**

पल्यूलयति केदारं लुनातीत्यर्थः, पल्युलयति धान्यं पूतं

करोतीत्यर्थः।

२७४. **वात गतिसुखसेवनयोः–**
वातयति पथिकं निदाघे शीतो वायुः, वातयति बहुभोगं वातुलः सेवत इत्यर्थः। वात गतिसुखे इति केचित्, सेवने इति केचित्, गतिमपनीय सुखसेवने इति केचित्।

२७५. **गवेष मार्गणे–**
गवेषयति गां गोरक्षको वने तिरोहिताम्।

२७६. **वास उपसेवायाम्–**
वासयति वसनानि धूपधूमः।

२७७. **निवास आच्छादने–**
निवासयति वसनेन जघनं युवतिः, अनिनिवासयत्।

२७८. **भाज पृथक्कर्मणि–**
भाजयति भ्रातृवर्गः पैतृकधनम्।

२७९. **सभाज प्रीतिसेवनयोः–**
सभाजयति सज्जनो भगवन्तम्। अन्यः सेवनस्थाने दर्शनं पठति।

२८०. **ऊन परिमाणे।** परिमाणमिह अल्पपरिमाणं प्रथमपरिमितात्– ऊनयति, न्यूनः परिहाणे इत्येके।

२८१. **ध्वन शब्दे–**
ध्वनयति मधुरिका, हेतौ ध्वनयति वेणुं, अयमन्यैर्न पठ्यते।

२८२. **कूट दाहे–**
कूटयति कपटेन खलः सज्जनमनः।

२८३-२८४. **केत ग्राम कुण गुण चामन्त्रणे।**
आमन्त्रणं गूढभाषणं, चकारात् कूटश्च–केतयति, ग्रामयति, कुणयति क्कण इति कश्चित् गुणयति।

२८५. **स्तेन चौर्ये–**
स्तेनयति धनमैकागारिकः। परस्मैभाषाः।
चर्चप्रभृतयः स्तेनपर्यन्ताः परस्मैपदिन इत्यर्थः।
आगर्वादात्मनेपदी। पदप्रभृति गर्वपर्यन्तो धातुरात्मनेपदीत्यर्थः,

जातौ एकवचनम्। ततः परमुभयपदिनो मन्तव्याः।

२८६. **पद गतौ–**

पदयते पदा पदातिको योद्धुम्।

२८७. **गृह ग्रहणे–**

गृहयते गृहिणीं गृहाभियोगं, अजगृहत, गृहयालुः।

२८८. **मृग अन्वेषणे–**

मृगयते मृगं मृगयुः।

२८९. **कुह विस्मायने–**

कुहयते कुहकेन कोकान्।

२९०-२९१. **शूर वीर विक्रान्तौ–**

शूरयते वीरयते वा वीरः संग्रामे विक्रमत इत्यर्थः।

२९२. **स्थूल परिबृंहणे–**

स्थूलयते वातुलमतिसौहित्यं, तवर्गद्वितीयोऽयम्।

२९३. **अर्थ उपयाञ्चायाम्–** अर्थयते अर्थम्।

२९४. **सत्र सन्तानक्रियायाम्–**

सातत्येन करणं त्यागस्येति लोकोपचारात्–सत्रयते दानपतिः दीनेभ्यः।

२९५. **संग्राम युद्धे–**

संग्रामयते वीरः परबलेन, अससंग्रामत। सोपसर्गोपदेशो ज्ञापयति समुदायात् प्रत्ययेऽपि नाममात्रस्य धातुसंज्ञान सोपसर्गसमुदायस्य तेन समवर्षयत् अभ्यहस्तयदित्यादि। परस्मैपदिनं कश्चित् पठति दुर्गसिंहस्तु शाकटायनमतानुसारी आत्मनेपदमेव मन्यते। तथा च कर्तुरायिः सलोपश्चेति तत्रोक्तं ननु कथं नियमः संग्राम युद्धे इति चुरादावात्मनेपदार्थः पाठः।

२९६. **गर्व माने–**

गर्वयते वित्तेनातिरिक्तः। अथ उभयपदिनः प्रतिपत्तव्याः।

२९७. **सूत्र अवमोचने।**

अवमोचनं वेष्टनं–सूत्रयति-ते गृहभूमिं सूत्रेण स्थपतिः।

अवमोचनं ग्रन्थनमिति कश्चित्, कस्यचिन्मते विमोचने इति पाठः।

२९८. **मूत्र प्रस्रवणे–**

मूत्रयति-ते बालः शय्यायां, मोमूत्र्यते।

२९९. **रूक्ष पारुष्ये–**

रूक्षयति-ते केशः शुद्धस्नानेन, पारुष्यमस्निग्धता। गर्वरूक्षप्रभृतेरदन्ततोपदेशो विकल्पितेनपक्षे चेक्रीयितनिवृत्त्यर्थः। वेक्ष दर्शने इत्येके, वेक्षयति।

३००-३०१. **पार तीर कर्मसमाप्तौ–**

पारयति तीरयति वा व्रतमभियुक्तः, पारणं-णा, तीरणं-णा।

३०२. **पुट संसर्गे–**

पुटयति-ते पुष्पं बहिर्गलेन।

३०३. **कत्र शैथिल्ये–**

कत्रयति-ते उदकेन सिन्दूरघटिका

३०४. **अंश समाघाते–**

अंशयति-ते वसु वणिक्, स्रंश? इत्येके, असस्रंशत्।

३०५. **चित्र चित्रीकरणे–**

आलेख्यादिकरणे–चित्रयति प्रतिमां चित्रकारः। कदाचिद्दर्शने च। पूर्वापेक्षया च चित्रयति सुचरितावदानं जनः, कदाचित् पश्यतीत्यर्थः।

३०६. **वट विभजने–**

वटयति-ते वा वटुर्वटकान्। इदनुबन्धोऽयमित्येके।

३०७. **लज प्रकाशने–**

लजयति-ते वा लाजाव्रजः, प्रकाशत इत्यर्थः। एतौ इदनुबन्धौ कैश्चित् पठ्येते–वण्टयति लञ्जयति, अनयोरिदनुबन्धयोरदन्तताबलादन्त्यस्याप्यकारस्य इनि दीर्घस्ततः पकारागमः, वण्टापयति लञ्जापयतीत्युदाहरति।

३०८. **मिश्र सम्पर्के–**

मिश्रयति-ते गुडेन धानाः मिश्रं करोतीत्यर्थः। दन्त्यान्त

इति कश्चित्।

३०९. **स्तोम श्लाघायाम्–**

स्तोमयति-ते वस्तु तत्त्वार्थवित्, अग्निष्टोमः, संघाते इति कश्चित्।

३१०-३११. **छिद्र कर्णभेदे–**

छिद्रयति कर्णयति वा कलसीं लोष्टेन, आकर्णयति श्रवणे, अथवा कर्णेनाभाषते इति इन् इति केचित्।

३१२. **अन्ध दृष्ट्युपसंघाते–**

अन्धयति जन्मतो दुर्दैवहतकः। दृष्ट्युपसंहारे इति केचित्।

३१३. **दण्ड दण्डनिपातने–**

दण्डयति-ते पण्डितसंमत्या नृपतिरपराधिनम्।

दण्डप्रभृतेर्लिङ्गात् इन कारितं धात्वर्थे इति सिद्धमेव चुरादिपाठाद् यथाभिधानं इनमन्तरेणापि प्रयोगाः, नन्वविशेषादिति फलाभावे सतीह वेदितव्यम्।

३१४. **अङ्क लक्षणे–**

अङ्कयति कुङ्कुमेन कामिनी कुचं, अङ्कियिषति।

अङ्ग लक्षण इति केचित्।

३१५-३१६. **सुख दुःख तत्क्रियायाम्–**

सुखयति प्रियोपगमः, दुःखयति दुर्वचनदुर्वादः।

३१७. **रस आस्वादनस्नेहनयोः–**

रसयति सितां मधुरप्रियः, रसयति सुधा (युवा, रमा) योषिति स्निह्यतीत्यर्थः।

३१८. **व्यय वित्तसमुत्सर्गे–** व्ययति-ते वित्तं बहुदाता।

३१९. **रूप रूपक्रियायाम्–**

रूपक्रिया राजपुत्रादिरूपस्य करणं रूपदर्शनं वा–रूपयति प्रतिमायां चित्रकारः, निरूपयति रूपं दर्पणे। निपूर्वो विचारणे–निरूपयति परमार्थमभियुक्तः।

३२०. **छेद द्विधाकरणे–**

छेदयति-ते दारु।

३२१. **व्रण गात्रविचूर्णने–**
व्रणयति बाणेन वैरिणं भटः।

३२२. **वर्ण वर्णक्रियाविस्तारगुणवचनेषु–**
वर्णयति पत्रं लिखतीत्यर्थः, वर्णयति वर्णं विस्तारयतीत्यर्थः, वर्णयति कविः स्तौतीत्यर्थः, गुणवचनं स्तवनमित्यर्थः।

३२३. **पर्ण हरितभावे–**
पर्णयति प्रावृट् तरून्।

३२४-३२५. **लाभ क्षप प्रेरणे–**
लाभयति-ते क्षपयति-ते वा क्षपां कथं कथमपि पथिकः। लाभ इति कश्चित् पठति। लाभ आप्रवरणे क्षप प्रेरणे इति गणद्वयं पठति कश्चित्।

३२६. **अघ पापकरणे–**
अघयति-ते लघुचेताः।

३२७. **बहुलमेतन्निदर्शनम्।**
यदेतत् चुरादिषु अदन्तधातुनिदर्शनं तद्बहुलं वेदितव्यं उपलक्षणमित्यर्थः। अतोऽनुक्ता अपि धातव उद्भावनीयाः। तेन वस निवासे–वा (व, रमा) सयति आन्दोलयति ओजयति स्फुटयति (अवधीरयति) अवगुण्ठयति निवासविलोडनप्राणनप्रकाशन-अवमनन-आवरणेषु प्रयोगा यथाभिधानं प्रयोज्याः, स्फटा स्फटित इत्यादयः।

३२८. **इनङ् अङ्गनिरसनेऽपि।**
अङ्गवाचिनो लिङ्गात् निरसने धात्वर्थे इन् स च ङानुबन्धो विधीयते। अतः कारितसंज्ञा न विहन्यते– हस्तौ निरस्यति हस्तयते पादयते भुजयते। निरसनेऽपीत्यपिशब्दस्य बह्वर्थत्वात् पुच्छमुत्क्षिपति उत्पुच्छयते गौः, पुच्छं परिक्षिपति परिपुच्छयते, भाण्डानि समाचिनोति संभाण्डयते वणिक्, चीवरं सम्मार्जयति परिदधाति वा सञ्चीवरयते भिक्षुरित्यादि यथाभिधानम्। कारितव्यपदेशत्वात् कारितस्यानामिड्विकरणे इति लोपो भवत्येव हस्त्यते पाद्यते।

३२९. **श्वेताश्वाश्वतरगालोडितह्वरकाणामश्वतरेतकलोपश्च।**
चकारेण हि बहुलार्थः समुच्चीयते। अयमर्थः–एषामिनङ् भवति यथासंख्यम्। अश्वतरइतकलोपश्च, ततो बहुलाधि-कारात् आचष्टेऽतिकामतीत्यर्थे श्वेताश्वमाचष्टे श्वेतयते, अश्वतरमाचष्टे अश्वयते, गालोडितमाचष्टे गालोडयते, ह्वरकमाचष्टे ह्वरयते। बहुलत्वादिन्प्रत्यये श्वेताश्वमाचष्टे तेनातिकामति वा श्वेतयति अश्वयतीत्यादि।

३३०. **मन्तुवन्तुविनां लुक् च।**
इह पुनरिनङ् न स्मर्यते। एतदन्तानां इन् एषां लुक् च ईशनमीट् ईण्मन्तमाचष्टे ईशयति एवं गोमन्तमाचष्टे गवयति गवः गवौ गवा इत्यच् प्रत्ययः पचादित्वात् स्रुग्वन्तमाचष्टे स्रुचयति, स्रग्विणमाचष्टे स्रजयति।

३३१. **धातोस्तृशब्दस्यापि।**
धातोर्विहितस्य तृशब्दस्य लुग्भवति इति परे कर्तारमाचष्टे कारयति, एवं भवितारमाचष्टे भावयति। गणस्य इटः प्रत्ययनिबन्धस्य निवर्तयति धातुपारायणीय एव, गन्तारमाचष्टे गमयति ह्रस्वः पूर्ववत्। इदं सूत्रं क्वचित् पुस्तके पतितं लेखनभ्रमात् कैश्चिदिदं न मन्यते व्यवस्थितवास्मरणात् कारयतीत्यादि।

३३२. **प्रशस्यस्य श्रः–**
श्रापयति।

३३३. **वृद्धस्य च ज्यः–**
ज्यापयति।

३३४. **अन्तिकबाढयोर्नेदसाधौ–**
नेदयति, साधयति।

३३५. **युवाल्पयोः कन् वा–**
युवानं आचष्टे अल्पं वा कनयति युवयति अल्पयति वा।

३३६. **स्थूलदूरयुवक्षिप्रक्षुद्राणामन्तस्थादेर्लोपो गुणश्च–**
स्थवयति दवयति यवयति क्षेपयति क्षोदयति।

३३७. **बहोर्यादिर्भूश्च–**
भूययति।

३३८. **प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घहूस्ववृद्धवृन्दारकाणां प्रस्थस्फवरगरबंहत्रपद्राघहूसवर्षवृन्दाः–**
प्रापयति स्थापयति स्फापयति वरयति गरयति बंहयति त्रपयति द्राघयति हूसयति वर्षयति वृन्दयति। स्फिरतृप्रशब्दौ विस्तीर्णकृच्छ्रयोर्यथायोगं वर्तेते।

३३९. **तद्वदिष्ठेमेयःसु बहुलम्।**
इन्वदित्यर्थः पटिष्ठः पटिमा पटीयान्।

३४०. **सत्यार्थवेदानामन्त आप् तु कारित एव–**
सत्यादीनामन्त आप आगमो भवति कारित एव न त्विष्ठादिषु, सत्यापयति अर्थापयति वेदापयति।

३४१. **एकस्वराणामादन्तानां च।**
एकस्वराणां आकारानां लिङ्गानां कारित एव आबागमो भवति–श्रापयति।
एतानि गणसूत्राणि।
इति गणवृत्तौ स्वार्थेनन्ताश्चुरादयः समाप्ताः।

कौमारहारगणकारविवारसारं
श्रीदुर्गसिंहविरचितं गणवृत्तिसंज्ञम्।
श्रीमद्रमाविरचितं च मनोरमाख्यं
दृष्ट्वा विविच्य विचितो गणवृत्तिसारः॥
बहूनि स्खलितान्यत्र पुस्तकानामशुद्धितः।
बीजकानां च बालिश्यात् क्षन्तव्यानि प्रसादये॥
इति श्रीमदानन्दरामबहुवाविरचितः
कातन्त्रधातुवृत्तिसारः।

अकारादिक्रमेण धातुसूचिः